# चतुर्थोऽध्यायः

## ज्योतिषशास्त्रे होरायाः परिज्ञापनम्

## अध्यायः– ४ ज्योतिषशास्त्रे होरायाः परिज्ञापनम्

कालवाचकस्य अहोरात्रस्य आद्यन्ताक्षरविलोपात् होराशब्दस्य निष्पत्ति-र्भवति यथोक्तं – **'होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्"** । 'होरा' इत्येतेन लग्नस्य तथा राशेरर्धभागस्यापि ज्ञानं भवति । होरासम्बन्धितं शास्त्रं होरा-शास्त्रमुच्यते । अस्मिन् होराशास्त्रे कस्यापि पुरुषस्य जन्मकुण्डलिविनिर्माय द्वादशभावेषु राशिषु च ग्रहाणां स्थितिवशात् बलाबलज्ञानपूर्वकं दशान्तर-दशाज्ञानञ्च कृत्वा सुखदुख–इष्टानिष्ट-उन्नत्यवनति–भाग्योदयादीनां मानजीवने घटितघटनां सर्वेषां पक्षाणां ज्ञानं विवेचनञ्च क्रियते । भट्टोत्पलः कथयति –

**"प्रतिष्ठायात्राविवादिनां लग्नग्रहवशेन च शुभाशुभफलं जगति यया निश्चियते सा होरा "** ।

जातकस्य जन्मपत्रमाध्यमेन पूर्वजन्मनि कृतस्य प्रारब्धकर्मणश्चाधारेण जातकः अस्मिन् जन्मनि किं शुभाशुभफलं अवाप्स्यतीति व्यपदिश्यते । अतः शुभाशुभकर्मफलसूचकं शास्त्रं होराशास्त्रमिति । सिद्धान्तशिरोमणौ वासनाभाष्ये विहितं यत् प्रारब्धकर्मप्रदर्शकं जातकशास्त्रम् । यथोक्तं –

**'जातकशास्त्रं प्रारब्धर्मविपाकव्यञ्जकम्'** ।

### ४.१ होराशास्त्रपरिचयः

विगतप्रकरणे ज्योतिषशास्त्रस्य संहितास्कन्धविषयेऽस्माभिः ज्ञातम् । स्कन्धत्रयात्मकस्य ज्योतिषशास्त्रस्य तृतीयः स्कन्धः 'होरा' इति कथ्यते । यत्र वैयक्तिकसम्बन्धेन फलादेशः क्रियते सा 'होरा' उच्यते । सामान्यतः ग्रहास्थिति-

तिथि-नक्षत्रादिभिः मानवस्य सुखदुःखादिप्राप्तिः यत्र निर्णीयते तदेव होराशास्त्रम् उच्यते। बृहत्संहितायाः विवृत्तिव्याख्यायां भट्टोत्पलः कथयति-

"प्रतिष्ठा-यात्राविवाहादीनां लग्नग्रहवशेन च शुभाशुभफलं जगति यया निश्चीयते सा होरा इति।" मेषादयो द्वादशलग्नराशयोऽहोरात्रान्तर्भूताः लग्नस्य च कालवशाज्ज्ञानम्। अतोऽहोरात्राश्रयत्वात् तत एव होरा-शब्दो व्युत्पाद्यते। अर्थात् होराशास्त्रे लग्नवशात् ग्रहवशाच्च प्रतिष्ठादीनां शुभाशुभफलज्ञानं क्रियते। मेशादयो द्वादशलग्नराशयः अहोरात्रे अन्तर्भवन्ति। कालवशात् लग्नस्य ज्ञानं लग्नवशाच्च शुभाशुभफलज्ञानम् अहोरात्राश्रयम् अस्ति। अत अहोरात्रशब्दादेव 'होरा' इति शब्दः निष्पद्यते इति। केचन विद्वांसः 'होरा' शब्दं फलितज्योतिषस्य अर्थे रूढं मन्यन्ते। अपि च- होराशब्दः अहोरात्रशब्दस्य आद्यान्ताक्षरविलोपनेन समुद्भूतः-

**अहोरात्रस्य पूर्वान्त्यलोपाद्धोरावशिष्यते।**[77]

सारावलीकारः होराशब्दस्य व्युत्पत्त्याश्रयम् अर्थं करोति यत्-

**आद्यन्तवर्णलोपाद्धोराऽस्माकं भवत्यहोरात्रात्।**

**तत्प्रसिद्धः सर्वो ग्रहभगणश्चिन्त्यते यस्मात्॥**[78]

अर्थात् 'अहोरात्रशब्दस्य आद्यन्तवर्णलोपात्'[79] 'होरा' इति शब्दो निष्पद्यते। होराशास्त्रे ग्रहनक्षत्राणां फलविवेचनं क्रियते। जन्मकुण्डलीमधिकृत्य द्वादशभावानां शुभाशुभफलानां विवेचनं होराशास्त्रस्य प्रधानविषयोऽस्ति। जातकशारदीयग्रन्थे प्रोक्तम्- "विधात्रा जन्मसमये यः पूर्वजन्मकृतकर्मानुसारि

---

[77]पाराशरहोराशास्त्रम् ४/१

[78] सारावली २/२

[79]पा. हो. शा., अ.८, श्लो.-२

सदसत्फलरेखा नरभालपट्टे लिख्यन्ते तासु रेखासु लिखितभाग्यलेखस्य प्रकाशनं होराशास्त्रं तथैव करोति यथान्धाकारावृत्तसदनस्थितघट-पटादिपदार्थस्य प्रकाशनं निशि प्रदीपः करोति ।[80]

## ४.२ होराशब्दस्य व्युत्पत्त्यर्थाः

हिंसा संवरणाद्यर्थाकाद् हुरधातोः पचाद्यचि टापि 'होरा' इति शब्दो निष्पद्यते । अथवा घञ् प्रत्यये सति टापि कृते 'हुर्यते' इति करणार्थकप्रयोगे होराशब्दः सिद्धिर्भवति । होराशब्दः व्यापको वर्तते नत्वेकदेशीयः, होराशब्दः व्यापकत्वात् बहुषु धातुषु सत्तां धारयते । "स्वृ" कौटिल्ये अथवा "स्वृ" शब्दोपतापयोः धातुतः 'ऋदोरण' इति सूत्रेण अपत्रत्यये गुणे च स्वरशब्द: निष्पद्यते, सकारस्य वर्णविपर्यये सति ह्वर(Hovr) इतिहोरा वाचकः आङ्ग्लशब्दः सिद्ध्यति । यतो हि चन्द्रार्कौ द्वावपि स्वरौ प्रतिहारं परिवृत्य सूर्योत्तरं चन्द्रस्वरः, चन्द्रोत्तरं सूर्यस्वरश्च प्रचलति, अतएव होराचक्रे द्वावपि राशि कर्कसिंहौ चन्द्रसूर्यग्रहौ, चन्द्रसूर्यहोराबोधकौ भवतः । मेदिनीकोषे होराशब्दस्य अर्थाः लग्नं, राश्यर्द्धं, रेखा, शास्त्रभेदश्च क्रियन्ते । इदानीं"क ट प य" सूत्रं गृहीत्वा होराशब्दस्य वास्तविकता प्रकटनीया-

अकारादयः स्वराः शून्यरूपेण स्वीक्रियन्ते । ककारमारभ्य झकारपर्यन्तं नवाङ्कानां ग्रहणं प्रथमम्, टकारमारभ्य धकारपर्यन्तनवाङ्कानां नवकं द्वितीयम्, पकारमारभ्य मकारपर्यन्तमङ्कानां पञ्चकं तृतीयं प्रसिद्धम्, यकारमारभ्य हकारपर्यन्तमङ्कानामष्टकं विज्ञेयम्। ञ्, न्, अक्षरौ शून्यसूचकौ इति कृत्वा

---

[80]या ब्रह्मणा विलिखिता नरभालपट्टे प्राग्जन्मकर्मसदसत् फलपाकराशिः । होरा प्रकाशयति तामिह वर्गपङ्क्तिं दीपो यथा निशि घटादिकमन्धकारे ।। जातकदीपः १/६ (यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिः । व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ।। लघुजातकम् १/३)

षोडशस्वराः। ञ्, न्, अक्षरौ च मिलित्वा अष्टादशशून्यबोधकाः भवन्ति । अनेन'ह्'कारस्य अष्टसंख्या, 'र'कारस्य च द्विसंख्या वर्तते, अङ्कानां वामतो गतिः इति विधानेन २८ अष्टाविंशतिः संख्या २८ अष्टाविंशनक्षत्राणां बोधो जायते । सर्वेऽपि ग्रहाः अष्टाविंशति नक्षत्रेष्वेव परिभ्रमन्ति। एवं अष्टाविंशति-नक्षत्राण्यधिकृत्य कृतं शास्त्रं होरास्कन्धरूपेण व्यापकं वर्तते । यदि वयं अ क ट प य श सूत्रं स्वीकुर्मः तदा शकारमारभ्य हकारपर्यन्तं हकारः चतुर्थो अक्षरो भवति, अतः चतुः संख्या ग्रहणेन तथा यकारमारभ्यरकारान्तं रकारः द्वितीयो वर्णो भवति, अतःद्वि संख्या ग्रहणेन (हो=४, रा=२) अङ्कानां वामतो गतिनियमेन २४ चतुर्विंशति संख्या २४ होरा ज्ञापिका संज्ञा स्वयमेव प्रत्यक्षी भवति । वैयाकरणानां मते व्यञ्जनेषु हकारस्य गणना पाणिनीयशाकटायनप्रभृतिभिर्मुनिभिः सर्वप्राथम्येन स्वीकृता वर्तते । अतः हो=१, रा=२, किन्तु वैदिकाः वैयाकरणाः अङ्कानां वामगतिं न स्वीकुर्वन्ति, अतः होरा=१२, संख्या द्वादशलग्नानां राशीनां वा द्योतकं स्वतः एव प्रवर्तते, इत्थं होराशब्दः द्वादशलग्नानां, द्वादशराशीनां, चतुर्विंशति होरा लग्नानां, अष्टाविंशतिनक्षत्रलग्नानां वेदाङ्गोक्तानां स्वयमेव साक्षात्कारतया लोचनगोचरी भविष्यति । दाक्षिणात्यानां नाडीशास्त्रं होरान्तर्गतं भविष्यति।लग्नेऽर्थे होराशब्दस्य निरूपणं यथा-

**संज्ञा वेश्माष्टमयोश्चतुरस्रं वै तपश्च नवमस्य ।**

**होरास्तदशजलानां चतुष्टयं कण्टकं केन्द्रम् ।।**[81]

अर्थात् द्वादशभावानां संज्ञावर्णनप्रसङ्गे संज्ञान्तरं प्रददन् कल्याणवर्मा कथयति- यच्चतुर्थ-अष्टमभावयोः चतुरस्रम्, नवमभावस्य तप इति । प्रथम-सप्तम-

[81]सारावली २/२८

दशम-चतुर्थभावानां चतुष्टय-कण्टक-केन्द्रेति संज्ञा भवन्ति । अत्र होराशब्दः लग्न-भाव-रूपार्थे प्रयुक्तोऽस्ति । राश्यर्द्धेऽर्थे होराशब्दस्य प्रयोगो यथा-

**होरा राशिदलं समे प्रथमतश्चन्द्रस्य भानो रतो ।**

**व्यात्यासा.........................................।।**[82]

अत्र राशिदलमितिशब्देन राशेः कश्चनभागः 'होरा' कथ्यते । आचार्यवराहमिहिरः बृहज्जातके ग्रन्थे कथ्यते-

**होराऽन्योऽङ्गविनिश्चयश्चकथितः स्कन्धस्तृतीयोऽपरः।**[83]

**होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् ।**

**कर्मार्जितं पूर्वभवे सदादि यत्तस्य पङ्क्ति समभिव्यनक्ति ।।**[84]

भट्टोत्पलः 'होरा' शब्दविषये आह- **'मेषादयो द्वादशलग्नराशयोऽहोरात्रान्तर्भूताः लग्नस्य च कालवशाज्ज्ञानम् ।** अतः अहोरात्राश्रयत्वात् तत एव होराशब्दो व्युत्पाद्यते इति । 'होरा'इति शब्दस्यार्थः कोषग्रन्थेषु(१) लग्नम्(२) राश्यर्द्धम्(३) रेखा(४) शास्त्रभेदश्चेति चत्वारोऽर्थाः सन्ति । यथा-**"होरा लग्ने राश्यर्द्धे रेखा शास्त्रभिदोरपि"** इति मेदिनी (१३०/१०२) केचन विद्वांसः अहोरात्रशब्दस्य पूर्वापरवर्णलोपाद् 'होरा' इति निष्पन्नं शब्दं प्रयुञ्जते । परं व्याकरणदृष्ट्या "हिंसासंवरणाद्यर्थकाद् हर्धातोः" हल् हर् हिंसासंवरणयोः (भ्वादिः-परस्पैपद-सेट, पचाद्यच्-३/१/१३४ सूत्रम्) इत्यस्माद्धातोः होरतीति पचाद्यचि टापि हर्यते इति घञ्, टाप् वा कृते अयं होराशब्दः सिद्धो भवति। "होरा" इति शब्दस्यार्थः

---

82 भावकुतूहलम् १/८

83 बृहज्जातकम् १/९

84 बृहज्जातकम् १/३

कोशग्रन्थेषु १ लग्नम्, २ राश्यर्द्धम्, ३ रेखा, ४ शास्त्रभेदश्चेति चत्वारोऽर्थाः सन्ति। यथा- "होरा लग्ने राश्यर्द्धे रेखा शास्त्रभिदोरपि" इति मेदिनी(१३०-१०२)। होरारत्ने "षष्ठं तृतीयं दशमञ्च राशिमेकादशञ्चोपचयक्षेमाहुः। होराग्रहस्थान-शशाङ्केभ्यः शेषाणि चैभ्योऽपचयात्मकानि ।।"[85] होराशब्दः राश्यर्द्धेऽर्थे भावकुतूहले, यथा- "होरा राशिदलं समे प्रथमतश्चन्द्रस्य भानोरतो"। व्यत्यासा।(भावकुतूहलम्१/८)। ज्योतिस्तत्त्वे- "विषमर्क्षेषु प्रथमहोराः स्युश्चण्डरोचिषः। द्वितीया शशिनो युक्षु व्यत्ययाद् गणयेत् सदा ।।" लघुजातके- "ग्रहहोराद्रेष्काणा नवभागो द्वादशांशत्रिंशः। वर्गः प्रत्येतव्यो ग्रहस्य यो यस्य निर्दिष्टः ।।(लघुजातकम् १/२३)होराशास्त्रे पूर्वजन्मार्जितानां शुभाशुभकर्मफलानां विवेचनं क्रियते। यथा-

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम्।**

**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ।।[86]**

होराशास्त्रे अन्यस्मिन् जन्मनि अर्जितानां शुभाशुभकर्मणां शुभाशुभफलज्ञानं क्रियते। शुभाशुभयोः अथवा अवश्यम्भाविनः किं व्यनक्ति इति जिगीषायाम् उच्यते शुभाशुभं द्विविधं (१) दृढकर्मोपार्जित, (२) अदृढकर्मोपार्जितञ्च। होराशास्त्रं शुभस्य, अशुभस्य, अवश्यंभाविनो वा फलस्य अभिव्यञ्जनं करोति। ग्रहाः हि पूर्वजन्मनि कृतकर्मभिः अर्जितं शुभाशुभफलं व्यञ्जयति। जातकस्य यस्य यादृक् सञ्चितं कर्म भवति स तदनुकूले काले जन्म लभते। ग्रहनक्षत्राणि अपि तथैव यथायोगम् अनुकूलाः प्रतिकूलाः वा भूत्वा शुभाशुभफलं प्रकटीकुर्वन्ति।

---

[85]होरारत्नम् १/९४

[86] लघुजातकम् १/३

शुभाशुभज्ञानानन्तरं नरः ग्रहशान्त्यादिविविधोपायेन अशुभस्य परिहारं कर्तुं प्रभवेदेत्तदर्थं फलादेशः क्रियते। फलादेशः ज्योतिषशास्त्रस्य विशिष्टो विषयोऽस्ति। जन्मकाले यस्य यस्य ग्रहादेः प्राबल्यं भवति सः तत्समानप्रकृतिको एव भवति इति यथा- मेलापकादौ फलादेशस्य सुमहत्प्रयोजनम् । अत एवोक्तं- "त्रिस्कन्धो नावसीदतीति" तस्माद् कल्याणवर्मा उक्तवान् – "अर्थार्जने सहायः पुरुषाणामा-पदर्णवे पोतः । यात्रासंये मन्त्री जातकमपहाय नास्त्यपरः ।।(सा. २/५) तदनुकूलमेव तस्य कर्मफलानि प्रस्फुटीभवन्ति।

## ४.३ होराशास्त्रस्य महत्त्वम्

होरास्कन्धः ज्योतिषशास्त्रस्य अत्युपयोगिस्कन्धोऽस्ति । ज्योतिषशास्त्रस्य व्यवहारोपयोगित्वे स्कन्धस्यास्य महद्योगदानम् अस्ति। होरास्कन्धे जन्मकुण्डल्याः द्वादशभावाः तत्फलानि च विविच्यन्ते । मानवजीवने जायमानानां सुख-दुःख-इष्टानिष्ट - उन्नत्यवनतिभाग्योदयानां शुभाशुभफलानां विवेचनमत्र क्रियते । ज्योतिषस्य होरास्कन्धस्य महत्त्वं कल्याणवर्मणः उक्त्या ज्ञातुं शक्यते-

**अर्थार्जने सहायः पुरुषाणामापदर्णवे पोतः ।**

**यात्रासमये मन्त्री जातकमपहाय नास्त्यपरः ।।**[87]

होराशास्त्रे ग्रहचारवशात् सन्तानादिसम्भवे, आयुर्दायसम्भवे, राज्यादि-सम्भवे च जन्मकुण्डल्यादिना निर्णयो भवति। प्राप्तव्यफलस्य प्रतिबन्धकं दुरितम् अपहर्तुं होराशास्त्रमेतद् अतीव उपयोगि अस्ति । शुभाशुभफलं दृष्ट्वा तादृशफलप्रदास्य शुभाशुभकर्मणः अनुमानमपि अत्र कर्तुं शक्यते। जातकस्य भाग्यं

---

[87] सारावली २/१

कदा फलीभविष्यति, पूर्णतः अंशतो वा फलं प्राप्स्यते इति ज्ञानं होराशास्त्रेणैव सम्पाद्यते । होराशास्त्रमिदं दिनरात्रिपक्षमासादिरूपाणां कालानां फलज्ञापकं भवति । जन्मकुण्डलीस्थानं लग्नादिद्वादशभावेषु स्थितानां ग्रहाणां दशान्तर्दशादिविवेचनं होराशास्त्रे क्रियते । पूर्वोपार्जितसदसत्कर्मपरिपाकस्य ज्ञानं तावत्पर्यन्तं न भवति यावत्पर्यन्तं तस्य फलं नापतति । होराशास्त्रं तस्य फलप्रदस्य कालस्य ज्ञानं कारयति अतो होराशास्त्रस्य आवश्यकत्वं सिद्धीभवति । शुभफलसूचकदशायाः पाककाले विधीयमाना यात्रा विनायासं फलदायिका भवति । अशुभफलसूचकदशायाः परिपाककाले विधीयमाना यात्रा हानिकारिणी भवतीति सम्यक्तया होराशास्त्रेण ज्ञायते अत एव कल्याणवर्मणा उक्तम्-

**विधात्रा लिखिता यस्य ललाटेऽक्षरमालिका ।**

**दैवज्ञस्तां पठेत् प्राज्ञः होरानिर्मलचक्षुषा ।।**[88]

होराशास्त्ररूपेण निर्मलचक्षुषा विद्वान् दैवज्ञः (ज्यौतिषज्ञः) ललाटे लिखितां भाग्यलेखां पठेद् इति । होरामकरन्दग्रन्थे तथैव कथयति-

**वर्णावली या लिखिता विधात्रा ललाटपट्टे भुवि मानवानाम् ।**

**होरादशानिर्मलया यथावत् तां दैवविद् वाचयतीति नान्यः ।।**[89]

पूर्वोक्तप्रकारेणैव अस्यार्थोऽपि अनुज्ञेयः ।

## ४.४ होराशास्त्रस्य विषयः

[88] सारावली, अ.-१, श्लोक.२

[89] होरामकरन्दः १/८

जन्मकुण्डलीम् अधिकृत्य द्वादशभावानां शुभाशुभफलविवेचनं होराशास्त्रस्य मुख्यो विषयः। शुभाशुभफलविवेचनात्प्राग् अत्र द्वादशराशीनां स्वरूपानुगुणवर्णनं, ग्रहाणां स्वभावस्वरूपवर्णनम्, जन्मलग्ननिर्णयः, षोडशवर्गविवेचनं, ग्रहाणाम् अवस्थाफलं, दशान्तर्दशाप्रत्यन्तर्दशा-सूक्ष्मान्तर्दशा, प्राणदशाफलविवेचनं च विशिष्टतया विश्लिष्यन्ते । होरास्कन्धे के के विषयाः विचार्यन्ते इत्यस्मिन् विषये वराहमिहिरेण-उक्तम्-

'होराशास्त्रेऽपि च राशिहोराद्रेष्कानवांशद्वादशभागत्रिंषडभागबलाबल-परिग्रहो ग्रहाणां दिक्-स्थान-काल-चेष्टाभिरनेक प्रकारकबलनिर्द्धारणं प्रकृतिधातु-द्रव्यजातिचेष्टापरिग्रहो निषेकजन्मकालविस्मापनप्रत्ययादेश सद्योमरणायुर्दाय-दशान्तर्दषाष्टकवर्गराजयोगचन्द्रयोगद्विग्रहादियोगानां नाभसादीनां च योगानां फलान्याश्रयभावावलोकाननिर्यानगत्यूकानि तत्कालप्रश्नशुभाशुभनिमित्तानि विवाहादीनां च कर्मणां करणम्' ।[90] पञ्चप्रभेदात्मकरूपजातक-ताजिक-मुहूर्त-प्रश्न-स्वप्नसमन्विते होरास्कन्धेऽस्मिन् वैयक्तिक-प्रतिपादनेन होराशास्त्रस्य मानवजीवनेऽत्यधिकं महत्त्वं वर्तते ।

## ४.५ होराशास्त्रस्य स्वरूपम्

ज्योतिषशास्त्रस्यास्तित्वं वैदिकमन्त्रेषु सर्वप्रथमं विकीर्णरूपेण प्राप्यते । वेदेषु ग्रहनक्षत्रादीनां चर्चा प्रकीर्णरूपेण मिलति । तत्र सूर्यादिग्रहाणां ध्रुवागस्त्यसप्तयर्ष्यादितारकानां च देवत्वरूपे स्तुतिपरकचर्चा गानमस्ति । तत्र सूर्यादिग्रहाऽऽधारितज्योतिषशास्त्रे गगनमण्डलं, सूर्याचन्द्रमसौ, नक्षत्राणां, तारकाणां, ऋतुनां, मासानां, दिवसानां च यथावसरं चमत्कारिकं वर्णनं

[90] बृहत् संहिता, अ.-१, श्लो.-१७

समुपलभ्यते।[91]उपर्युक्तानां विवेचनेन एव शास्त्रमिदं कालशास्त्रमपि कथ्यते । तत्र प्रमाणं श्रीमद्भागवते तद्यथा- **“सहि सर्वेषां ज्योतिर्गणनां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ-ईश्वरेण विहितः शश्वदवभावते** ।[92]यथा मेढीस्तम्भं परितः पशवः ह्रस्वदीर्घसमानराज्या जङ्घाग्रे क्रमशः समीपदूरमध्यभागे स्थित्वा स्तम्भं परितः वर्तुलं कृत्य परिभ्रमन्ति, एवमेव नक्षत्राणि, ग्रहाः च अन्तर्बहिर्योगेन कालचक्र आयोजिताः ध्रुवमेवावलम्ब्य वायुप्रेरिताः आकल्यान्तं परिचङ्क्रमन्ति । उक्तं श्रीमद्भागवते- **“नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तन्ते एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतन्ति** ।[93]कालवाचकाहोरात्रशब्दात् होराशब्दोऽवशिष्यते । यथोक्तम् –

**आद्यन्तवर्णलोपाद्होराशास्त्रं भवत्यहोरात्रात् ।**

**तत्प्रतिबद्धश्चायं ग्रहभगणश्चिन्त्यते यस्मात् ।।**[94]

अहोरात्रशब्दादेव होराशास्त्रस्य व्युत्पत्तिविषये भट्टोत्पलः युक्तिपूर्वकं कथयति यदेकस्मिन्नहोरात्रे द्वादशलग्नानि व्यतीतानि भवन्ति । लग्नं च कालसूर्ययोर्वशीभूतम् । समस्तं शुभाशुभज्ञानस्य लग्नाश्रयत्वात् कालस्य समयस्य वावस्थितिः दिनरात्र्याभ्यान्तरत्वाच्च अहोरात्रशब्दादेव होराशास्त्रस्य निष्पत्तिर्भवति। उक्तं च तेन-

---

91 ज्यो.शा. इ. पृ. १०

92 श्रीमद्भागवतम् ५/२३/२

93 श्रीमद्भागवतम् ५/२३/३

94 सारावली, अ.-१, श्लोक.२

**“मेषादयो द्वादशलग्नराशयोऽहोरात्रान्तर्भूताः लग्नस्य च कालवशाज्ज्ञानम् । लग्नवशाच्छुभाशुभज्ञानं अतोऽहोरात्राश्रयत्वात् तत एव होराशब्दो व्युत्पाद्यते ।”**[95]

कर्मवादस्य सिद्धान्तानुसारं जन्मजन्मान्तरेष्वर्जितानां कर्मणां शुभाशुभ-फलज्ञातुं ग्रहस्थित्याद्यनुसारं जातकस्य व्यष्टिगतफलादेशार्थं दैवज्ञाः यं शास्त्रं समाश्रयन्ते तच्छास्त्रं नाम होराशास्त्रमिति । होराशास्त्रेऽस्मिन् जातकस्य जन्मकालिककुण्डलीं विधाय तस्य शुभाशुभकर्मणां फलविवेचनं भवति । इदं कर्म त्रिविधम् – सञ्चितम्, प्रारब्धं क्रियमाणं चेति । जन्मजन्मान्तरे कृतं कर्म सञ्चित-संज्ञया विज्ञायते । इह जन्मनि सञ्चितकर्मवशात् भोग्यकर्मणां प्रारब्धसंज्ञा । क्रियमाणकर्मे जातकः स्वतन्त्रो भवति । शुभकर्मणि करोति तदा फलमपि शुभमशुभं चेत्तदा अशुभमेव फलमधिगच्छति । अतः मनुष्यः सञ्चितापाप-पुण्यजन्यकर्मणा सुखं दुःखं च भुञ्जतेति । यथोक्तम्-

**नैवाकृतिः फलति नैव कुलं न शीलं विद्याऽपि नैव न च यत्नकृतापि सेवा ।**

**भाग्यानि पूर्वतपसा खलु सञ्चितानि काले फलन्ति पुरुषस्य यथैव वृक्षाः ।।**[96]

परञ्च पुरुषार्थमाध्यमेन अनादृष्ट दुष्फलं प्रतिबाध्यते न्यूनं च कर्तुं शक्यते । तात्पर्योऽयमस्ति यत् पुरुषार्थस्य प्रबलत्वे सति अदृष्टफलापेक्षयाऽदृष्टनाशो भवति एवं सद्दृष्यापेक्षयाऽसत्पुरुषार्थप्राबल्ये दुःखस्य प्राप्तिर्भवति । तस्मात् समीचीनमेतत् यत् मनुष्यः पूर्वोपार्जितैः सादृष्टकर्मभिः सह वर्तमाने यानि शुभाशुभकर्माणि करोति तेषां कर्मणां प्रभावस्तस्य पूर्वोपार्जितऽदृष्टेवश्यमेव भवति । अत ग्रहाश्रितं फलमपि पुरुषयत्नाधीनो भवति । यथा “प्रयत्नं विना मन्दोऽपि न

---

[95]बृ.जा. भट्टोत्पलटीका, पृ. सं. ७

[96]नीतिशतकम् श्लोकः-११४

प्रवर्तते” इति न्यायानुसारेण प्रयत्नं विना फलस्य साक्षात्कारो न भवति । यत्नबलाबलानुसारमेव फलोपलब्धिर्भवति । केवलं भाग्यमेव इष्टफले न समर्थो भवति-

**फलेद्यदि प्राक्तमेव तत्किं कृष्याद्युपायेषु परः प्रयत्नः ।**

**श्रुतिः स्मृतिश्चापि नृणां निषेधविध्यात्मके कर्मणि किं निषण्णः ।।**[97]

पुरुषार्थः चेन्न भवेत् तदा जीवस्य मुक्तिरपि न भविष्यति यतो सा तु पुरुषार्थवशादेवेति । अतः फलसिद्धये उभयोः कर्मपुरुषार्थयोरावश्यकत्वं भवति । तस्मात् ग्रहाणां विषामृतोभयमिश्रणरूपकरणनामाधारेण तस्य गतिस्थितिदृष्टि-विषयादि सम्बन्धमाध्यमेन शुभाशुभफलज्ञानं होराशास्त्रमाध्यमेन दीयते यत् परिवर्तनशीलं न त्वपरिहार्यम् ।

मनुजैः पूर्वजन्मार्जितानाम् अवश्यंभाविसदादिकर्मणां अनिवार्यतया न घटितानामसद्कर्मणां सदासद-मिश्रितकर्मणाञ्च फलपरिपाककालसूचकत्वा-देवास्य होराशास्त्रस्य प्रयोजनम् सिद्ध्यति । एतेषु कर्मसु आबद्धमूलदृढ(सत्) कर्मफलस्य विचारः दर्षान्तर्दशादिभिः निर्बलमूलकर्मविचारः अष्टकवर्गेण गोचरेण वा तथा च सदसद्फलविचारः योगादिभिः कर्त्तव्यः । रुद्रभट्टोऽपि विषयेऽस्मिन् कथयति-

**दशाप्रभेदेन विचिन्त्येद्दृढं दृढेतरं चाष्टकवर्गगोचरैः ।**

**दृढादृढं योगवशेन चिन्त्येदिति त्रिधा जातकसूक्ष्मसङ्ग्रहः ।।**[98]

---

[97]भा.ज्यो., वै. वि., पृ. ३

[98]बृ.जा., पृ. सं. ३

अतः होराशास्त्रमाध्यमेन यदि जनाः प्रारब्धस्य ज्ञानं न करिष्यन्ति चेत्तदा युक्तिपुरुषार्थौ विफलो भविष्यतः । प्राक्जन्मनि कृतकर्मणां ज्ञानं सत्येव पूर्वसञ्चितकर्मास्य प्रायश्चित्तं कृत्वैव तन्निवारयितुं प्रयत्नः यदा भविष्यति तदैव पुरुषार्थो सफलो भविष्यति । बीजरूपं भाग्यं जातकः पुरुषार्थमाध्यमेन पल्लवितं ददाति । फलपाकसमयज्ञानमेव होराशास्त्रमिति । कर्मफलविशेषेण जातकः सुख-दुःखात्मक जीवनस्ययापनं करोति । कर्म एव भाग्यरूपेण परिवर्तते । शास्त्रोक्तकर्मणा भाग्यपरिवर्तनमेव ज्योतिषशास्त्रस्योपादेयत्वं द्योतयतो येन मानवजीवनस्य सार्थकता भवति ।

## ४.६ होराशास्त्रस्य वैशिष्ट्यम्

**"अभिधेयं तु जगतः शुभाशुभनिरूपणम्"**[99]इति महर्षिनारदोक्तवचनेन सिद्ध्यति यदस्य समस्तजगतः शुभाशुभनिरूपणमेव ज्योतिषशास्त्रस्य प्रयोजन-मस्ति । मानवजीवनस्य पथप्रदर्शनं ज्योतिषशास्त्रस्य फलितप्रभेदान्तर्गतहोरा-स्कन्धे भवति । जन्मकुण्डलीमाधारीकृत्य द्वादशभावानां शुभाशुभफलविवेचनमेव होराशास्त्रस्य प्रधानविषयोऽस्ति । होराशास्त्रमिदं लग्नमाध्यमेन द्वादशभावेषु विभक्तानि भचक्रखण्डानि, तत्सम्बन्धितादित्या-दिग्रहाणां शुभाषुभत्वस्य गुणाधारं जन्मचक्रमाध्यमेन प्राणिनः शुभाशुभफलं दर्शयति । कुण्डली हि मानवस्य पूर्वजन्मार्जितानां कर्मणां मूर्तिमान् रूपम् । यथा विशालवटवृक्षस्य समावेशः तस्य बीजाङ्कुरे वर्तते तथैव प्रत्येकस्य मानवस्य पूर्वजन्मान्तरे कृतकर्माणि जन्म-कुण्डल्यामङ्कितानि भवन्ति । यथोक्तम्-

---

[99]नारदसंहिता, अ.-१, श्लो. ५

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम् ।**

**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ।।**[100]

होराशास्त्रे जातकस्य शुभाशुभफलसम्बन्धिविचारः सूक्ष्मतया विधीयते । होराशास्त्रं जीवने प्रचलितस्य समस्तघटनाचक्रस्य यथार्थरूपेण ज्ञानं कारयति । यद्यपि ज्योतिषशास्त्रेमानवजीवनस्य विविधपक्षाणां ज्ञानार्थमनेके मार्गास्सन्ति तथापि यादृशं ज्ञानं होराशास्त्रेण भवति न तादृशमन्येन केनापि शास्त्रेण भवितुमर्हति। होराशास्त्रस्य दैवज्ञस्य सा दिव्यदृष्टिरसति यया सः नरभालपट्टे विधात्रालिखितामक्षरमालिकां सुगमतया पठितुं शक्नोति । यथोक्तम्-

**विधात्रा लिखिता याऽसौ ललाटेऽक्षरमालिकाम् ।**

**दैवज्ञस्तां पठेद्व्यक्तं होरानिर्मलचक्षुषा ।।**[101]

होराशास्त्रमिदं नरमस्तके लिखितभाग्यलेखस्य प्रकाशनं अन्धकारवृत्तस-दनस्थित पटादिपदार्थप्रकाशनमिव करोति । जन्मकुण्डलीमाधारीकृत्य शुभाशु-भदशान्तर्दशादीनां ज्ञानमवाप्य तदनुकूलवाणिज्यादिकर्मणां शुभसमये, यात्रायाः विद्यायाश्च प्रारम्भेण, धनादिकस्य मनोरथादेश्च सिद्धिः होराशास्त्रं ज्ञात्वैव भवितुं शक्यते । होराशास्त्रमिदं मनुष्याणां धनार्जने सहायं करोति, विपत्समुद्रे नौरिव कार्यं करोति । इत्थं सम्पदिसहायकं, विपतिसमुद्धारकं, कृत्याकृत्यप्रवृत्ति-निवृत्तिकारकं, सर्वकल्याणकरञ्च जातकशास्त्रमपहाय नान्यत् किमपि लोकोपकारकं शास्त्रं विद्यते यदेतादृशं साहाय्यं कुर्यात् । तथोक्तं सारावल्याम्-

---

[100]लघुजातकम्, १/३

[101]सारावली २/१

**अथार्जने सहाय पुरुषाणामापदर्णवे पोतः ।**

**यात्रासमये मन्त्री जातकमपहाय नास्त्यपरः ।।**[102]

जगत्यस्मिन् यत्किञ्चिदपि शुभाशुभकर्म अस्माभिः क्रियते तत्सर्वं होराशास्त्राधीनमेव। यतो हि कृतस्य कर्मणः शुभाशुभव्यञ्जकमिदं शास्त्रं व्यवतिष्ठते । होराशात्रे यत्किञ्चिदपि फलं प्रतिपद्यते तत्सर्वं पूर्वकृतकर्मणां परिपाकोऽस्ति । होराशास्त्रतिरिक्तं केनचिदरिक्तं केनचिदन्येन शास्त्रेण कर्मणां विषये यथार्थज्ञानं न भविष्यति । ग्रहा हि पूर्वजन्मकर्मार्जितं शुभाशुभफलं व्यञ्जयन्तीत्येतस्य कथनस्य अयमेवाशयो यद्यस्य यादृक् सञ्चितं कर्म स तदनुकूले समये जन्म लभते । ग्रहनक्षत्राण्यपि तथैव यथायोगमनुकूलाः प्रतिकूलाः वा भूत्वा शुभाशुभं वा फलं प्रकटयन्ति । शुभाशुभज्ञानानान्तरं नरः शान्त्यादिविविधोपायेनाशुभं परिहर्तुं प्रभवेदिति फलादेशस्य महत्त्वम् । यस्य जन्मनि यस्य-यस्य ग्रहादेः प्राबल्यम स तत्समानप्राकृतिक एव भवतीति मेलापकापवादस्य सुमहत्प्रयोजनम् । अतएवोक्तं त्रिस्कन्धज्ञानेनावसीदतीति । अतोऽस्य शास्त्रस्य महत्त्वं स्वत एव सिद्ध्यति । होराशास्त्रस्य मानवजीवनेत्यधिकं महत्त्वमुपयोगित्वञ्च वर्तते । सर्वे जनाः स्वभविष्यज्ञातुं सततमिच्छन्ति। अस्मादेव कारणादास्य स्कन्धस्य सर्वाधिकरूपेण प्रचारो दृश्यते । स्कन्धोऽयं शिशोः जन्मतः मरणपर्यन्तं शुभाशुभफलं प्रकटयन् पिण्डब्रह्माण्डयोराखिलरहस्यजातं प्रकटीकरोति । यदि कश्चिद् दैवज्ञः कस्यचिन्मानवस्योचितप्रकारेण जन्मपत्रं निर्माति तेन तस्य मनुष्यस्य गुणाः प्रकृतिरपि जानाति । दैवज्ञाः जातकपत्रमवलोक्य तस्य जीवने सम्भाव्यघटनानां

---

[102]सारावली, १/५

ज्ञानं पूर्वमेव प्राप्नुवन्ति । विधात्रातिरिक्तं कुशलदैवज्ञ एव एतत् कार्यं कर्तुं शक्नोति । यथोक्तम्-

"Those who know astrology can onlt indicate in a way what will take place in future who else, except the creator brahma can with certainty what will definitely happen."[103]

अनेनैव प्रकारेण जातकः होराशास्त्रमाध्यमेन स्वजीवनस्य समस्तघटनानां ज्ञानं करोति । ग्रहनक्षत्रादिकृद्दोषारिष्टफलप्रशमनार्थं ज्योतिशशास्त्म भूत-वर्तमान-भविष्यकालिकघटनाक्रमस्य परिचयं दत्वा मनुष्यं स्वकर्मानुष्ठातुं प्रेरयति । अतएव स्वकर्मानुष्ठातुं पौरुषं च साधनार्थं होराशास्त्रस्यास्य महती उपयोगिता वर्तते । मानवस्य कालप्रभावदर्शकत्वेनास्य होराशास्त्रस्य वैशिष्ट्यं सार्वदेशिकं, सार्वभौमिकं सार्वकालिकञ्चास्ति ।

**'अभिधेयं तु जगतः शुभाशुभनिरूपणम् '** इति महर्षिनारदोक्तवचनेन सिध्यति यदस्य समस्तजगतः शुभाशुभनिरुपणमैव होराज्योतिषशास्त्रस्य प्रयोजनमस्ति । मानवजीवनस्य पथप्रदर्शकः वर्तते होराशास्त्रम् । जन्म-कुण्डलीमाधृत्य द्वादशभावानां शुभाशुभफलविवेचनमेव होराशास्त्रस्य प्रधान-विषयोऽस्ति । लग्नमाध्यमेन भचक्रस्य द्वादशभावेषु विभाजनं क्रियते । तेषां ग्रहाणां शुभाशुभगुणाऽऽधारेण प्राणिनः शुभाशुभफलकथनं भवति । कुण्डली हि मानवस्य पूर्वजन्मार्जितानां कर्मणां मूर्तिमान् रूपं भवति । यथा विशालवटवृक्षस्य समावेशः तस्य बीजाङ्कुरे भवति, तथैव प्रत्येकमानवस्य पूर्वजन्मान्तरकृतकर्माणि

---

103The astrological magazine, banglor, jan-1965, page-3

जन्मकुण्डल्यां अङ्कितानि भवन्ति, इत्थं होराशास्त्रं पूर्वजन्मार्जितकर्मणां फलानि प्रकटयति।

होराशास्त्रे जातकस्य शुभाशुभफलसम्बन्धिविचारः सुक्ष्मतया विधीयते। होराशास्त्रं जीवने प्रचलितस्य समस्तघटनाक्रमस्य यथार्थरुपेण ज्ञानं कारयति। यद्यपि ज्योतिषशास्त्रे मानवजीवनस्य विविधपक्षाणाम् ज्ञानार्थमनेके मार्गाः सन्ति तथापि यादृशं ज्ञानं होराशास्त्रेण भवति तादृशम् अन्येन केनापि शास्त्रेण न भवितुमर्हति। होराशास्त्रदैवज्ञस्य सा दिव्यदृष्टिः भवति यत्- यया सः नरभालपट्टे विधात्रा लिखिताम् अक्षरमालिकां सुगमतया पठितुं शक्नोति।

जन्मकुण्डलीमाधारीकृत्य शुभाशुभदशान्तर्दशादीनां ज्ञानमवाप्य तदनुकुल-वाणिज्यादिकर्मणां शुभसमये यात्रायाः विद्यायाश्च प्रारम्भेण धनादिकस्य मनोरथादेश्च सिद्धिः होराशास्त्रं ज्ञात्वैव भवितुं शक्यते।

होराशास्त्रंमिदं मनुष्याणां धनार्जने साहाय्यं करोति, विपत्समुद्रे नौरिव कार्यं करोति। इत्थं सम्पदि सहायकं, विपदि समुद्धारकं, कृत्याकृत्यप्रवृत्तिनिवृत्तिकारकं सर्वकल्याणञ्च जातकशास्त्रमपाहाय नान्यत् किमपि लोकोपकारकः शास्त्रं विद्यते यत् एतादृशं माहाय्यं कुर्यात्।

यथोक्तम् सारावल्याम् –

**अर्थार्जने सहाय पुरुषाणामापदर्णवे पोतः।**

**यात्रसमये मन्त्री जातकमपाय नास्त्यपरः।।**[104]

[104]सारावली २/२

जगत्यस्मिन् यत्किञ्चिदपि शुभाशुभकर्म अस्माभिः क्रियते तत्सर्वम् होराशास्त्राधीनमेव। यतो हि कृतस्य कर्मणः शुभाशुभव्यञ्जकमिदं शस्त्रं व्यवतिष्ठते। होराशास्त्रे यत्किञ्चिदपि फलं प्रतिपाद्यते तत्सर्वम् पूर्वकृतकर्मणां परिपाकोऽस्ति। होराशास्त्रातिरिक्तं केनचिदनयेन शास्त्रेण कर्मविषये यथार्थज्ञानं न भवति। अतोऽस्य महत्त्वं स्वत एव सिद्ध्यति।

होराशास्त्रस्य मानवजीवने अत्यधिकं महत्वम् उपयोगित्वं च वर्तते। सर्वे जनाः स्वभविष्यज्ञातुं सततमिच्छन्ति। अस्मादेव कारणादस्य स्कन्धस्य सर्वाधिकरूपेण प्रचारो दृश्यते। स्कन्धोऽयं शिशोः जन्मतः मरणपर्यन्तं शुभाशुभफलं प्रकटयन् पिण्डब्रम्हाण्डयोरखिलरहस्यजातं प्रकटीकरोति। यदि कश्चित् दैवज्ञः कस्यचित् मानवस्य उचितप्रकारेण जन्मपत्रं निर्माति तेन सः तस्य जनस्य गुणान् प्रकृतिं च जानाति। दैवज्ञाः जातकपत्रमवलोक्य तस्य जीवने सम्भाव्यघटनानां ज्ञानं पूर्वमेव प्राप्नुवन्ति। विधात्रारिक्तं कुशलदैवज्ञ एव एतत् कार्यं कर्तुं शक्नोति। अनेनैव प्रकारेण जातकः होराशास्त्रमाध्यमेन स्वजीवनस्य समस्तघटनानां ज्ञानं करोति। ग्रहनक्षत्रादिकृद्दोषारिष्टंफलप्रशमनार्थम् ज्योतिषशास्त्रं भूतभविष्यवर्तमान्कालिक-घटनाक्रमस्य परिचयं दत्वा मनुष्यं स्वकर्मानुष्ठातुं पौरुषं च साधनार्थं होराशास्त्रस्य वैशिष्टयं सार्वदेशिकम् सार्वभौमिकम् सार्वकालिकञ्चास्ति।

अस्मिन् होराशास्त्रे न केवलं ग्रहाणां शुभाशुभस्थितिवशात् मानव-जीवनोपरि तेषां शुभाशुभप्रभावविवेचनमस्ति अपितु अशुभग्रहाणां निर्बलग्रहाणां वा शान्त्योपायाः अपि सम्यक्तया निरूपिताः सन्ति। निर्बलग्रहाणां शान्त्यर्थं मन्त्रप्रयोगः, रत्नधारणं, दानद्रव्याणि, औषधिस्नान-इत्यादि उपायाः होराग्रन्थेषु

प्राप्यन्ते । एवं भविष्ये सम्भावितघटनानां ज्ञानं कृत्वा मन्त्ररत्नधार-णौषधीस्नानमित्याद्यनुष्ठानैः तेषां घटनानां निराकरणमपि होराशास्त्रेण क्रियते ।

## ४.७ होराशास्त्रस्योपयोगिता

वराहमिहिरस्य कथनमस्ति यत् पूर्वजन्मनि प्राणिभिः यद् शुभाशुभं कर्म कृतमस्ति, तदिदं शास्त्रं तथैव व्यनक्ति यथा अन्धकारे अदृश्यपदार्थान् दीपकः । बृहज्जातकस्य टीकाकारस्य भट्टोत्पलस्यानुसारेण कानिचित् कर्माणि दृढमूलकानि भवन्ति कानिचिच्च शिथिलमूलकानि भवन्ति । दृढमूलककर्माणां फलं निश्चयेन भोक्तव्यं भवति, पुनश्च शिथिलमूलककर्मणां फलं ज्योतिषशास्त्रेण विशेषतः होराशास्त्रेण ज्ञात्वा दान-जप-तपहवनादिभिः निवारयितुं शक्यते । यथा-

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम् ।**

**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ।।**[105]

**विधात्रा लिखिता मासौ ललाटेक्षर मालिका ।**

**दैवज्ञस्तां पठेत् व्यक्तं होरानिर्मलचक्षुषा ।।**[106]

अतएव कथितमस्ति यत् जन्मकालिक जातकस्य ग्रहनक्षत्रतारादीनां परिस्थित्यनुसारेणैव मानवस्य सुखदुःखयोः, शुभाशुभयोः निरूपणमस्मिन्स्कन्धे कृतमस्ति । मानवजीवनस्य इष्टानिष्टयोः, उन्नत्यवनत्योः, लाभालाभयोः, जयपराजययोः, भाग्यचिन्तनादि शुभाशुभविषयाणां वर्णनमपि अस्मिन् शास्त्राधारेण क्रियते । एवमेव संहिताग्रन्थेषु दिक्शोधनं, शल्योद्धारः,

---

[105]नारदसंहिता, महर्षिनारदविरचिता, मोतीलाल बनारसीदास,दिल्ली

[106]भारतीयज्योतिषम्, श्रीबालकृष्णदीक्षितः, चौखम्बा विद्याभवन, वाराणसी

मेलापकविषयः, गृहोपकरणं, इष्टिका-द्वारादीनां च स्थापनं, गृहारम्भ-गृहप्रवेशनिर्णयादीनां प्रमुखविषयाणां विचारः अनेनैव भवति । अस्य शास्त्रस्य महती उपयोगिता इयं वर्तते यत् इदं शास्त्रं समस्त मानवजीवनस्य प्रत्यक्षपरोक्षरहस्यान् विवेचयति, प्रतीकैश्च समस्तं जीवनं प्रत्यक्षरूपेण तेनैव प्रकारेण प्रकटयति येन प्रकारेण दीपः अन्धकारे स्थितं वस्तुं दर्शयति । मानवस्य सर्वमपि व्यावहारिककार्यम् अस्य शास्त्रस्य ज्ञानं विना अग्रे न आयाति । सर्वतो भावेन ज्योतिष(होरा)शास्त्रस्यैवोपयोगिता अस्माकं जीवने सर्वेषु क्षेत्रेषु दरीदृश्यते । एवम् अस्माभिर्वक्तुं शक्यते यत् भारतीयज्योतिषं पूर्णतया मानवजीवनोपयोगी शास्त्रमस्ति। उक्तं केनचित् –

**विफलान्यशास्त्राणि विवादस्तेषु केवलम् ।**

**सफलं ज्योतिषं शास्त्रं चन्द्राकौ यत्र साक्षिणौ ।।**[107]

ज्योतिर्विवरणग्रन्थेऽपि कथितमस्ति यत् ज्योतिषशास्त्रं पुण्य प्रदं स्वतः प्रामाण्ययुक्तं च शास्त्र मस्ति, प्रत्यक्षता एवास्याहारो अस्ति-

**ज्योतिः शास्त्रमिदं पुण्यं प्राहुर्नयविदो बुधाः ।**

**स्वतः प्रामाण्यमस्यास्ति सत्यं प्रत्यक्षतो यतः ।।**[108]

अनेन शास्त्रेण मुख्यरूपेण मानवजीवने घटित-घटनानां विचारः क्रियते । वस्तुतः जनिमतां मृत्यु-पर्यन्तं समस्त जीवनकाले सुख-दुःख वा ह्रास-वृद्धिर्वा प्रगत्यवनतिर्वा कदा कादा भविष्यति ज्ञानमस्य ज्योतिषशास्त्रस्य

---

[107]सूर्यसिद्धान्तः, कपिलेश्वरशास्त्री, चौखम्बा संस्कृतसंस्थान, वाराणसी

[108]मुहूर्तचिन्तामणिः, श्रीरामदैवज्ञविरचितः, चौखम्बा विद्याभवन, वाराणसी (International journal of Scientific Reserch in Science and Technology (www.ijsrst.com) प्रकाशितलेखः ।

प्रमुखमुद्देश्यमस्ति। ज्योतिषशास्त्रे विद्वद्भिः दैवज्ञैः सम्यग्विचारार्थं विविधाः पद्धत्यः अङ्गीकृता, यासु जातकशास्त्रस्य, ताजिकशास्त्रस्य, ग्रहगोचरशास्त्रस्य च पद्धत्यः प्रमुखाः सन्ति ।

जातकशास्त्रे मानवस्य जन्मकालस्य ज्ञानं तथा च तस्य जन्मकुण्डलीं निर्माय तस्य समस्तजीवनस्य सम्यक् फलं ज्ञायते । ताजिकशासत्रे वर्षप्रवेशकालस्यानुसारं वर्षकुण्डली निर्माय वर्षाभ्यन्तरे घटित-घटनानां विचारः क्रियते । प्रश्नशास्त्रे कस्यापि तात्कालिकस्य प्रश्नस्य गोचरद्वारा तात्कालिकस्थितेः विचारो क्रियते । इत्थं ज्योतिषशास्त्रस्य समस्तैः पद्धतिभिर्मानवजीवनक्रमस्य जीवने घटित-घटनानां विचारो भवति। यतोहि जन्मजन्मान्तरेष्वर्जितानां कर्मणां यत् फलं भवति तेन जातकं यः योजयति स भवति योगः इत्युक्तत्वात् फलं हि कर्मबन्धमित्युच्यते। भारतीयदर्शनमतानुसारेण तच्चकर्म त्रिविधं भवति । सञ्चितकर्म, प्रारब्धकर्म, क्रियमाणं कर्म च । वर्तमानक्षणं यावत् कृतं कर्म जन्मनाम् अथवा जन्मजन्मान्तराणां वा भवेत्सर्वं सञ्चितं कथ्यते । अत एषां सर्वेषां फलं सहैव न सम्भवति। परिणामतः सञ्चितकर्मणांफलं क्रमशोऽनुभूयते। इत्थं सञ्चितेभ्यो यावतां कर्मणां फलं वर्तमानकाले प्रारब्धं तावन्मितमेव प्रारब्धं कथ्यते तात्पर्योऽयमस्ति यज्जन्मजन्मान्तराणां सञ्चितकर्मणां भण्डारस्य समूहस्य वा लघुभागः प्रारब्धः कथ्यते । यत्कार्यं वर्तमानक्षणे क्रियतेऽथवा भविष्यत्काले करिष्यते तत् क्रियमाणमिति कथ्यते । एषां प्रकारत्रयाणां कर्मणां यदनिवार्यफलं भवति तत्सर्वं कर्मानुबन्धमिति कथ्यते । यतो हि कर्माणि त्रिविधानि सन्ति, अतो ज्योतिषशास्त्रस्य विशेषतः होराशास्त्रस्य मनीषिभिरेषां कर्मणां फलज्ञानार्थं भिन्नाः भिन्नाः पद्धतयः स्वीकृताः । यथा- जन्मकुण्डल्या सञ्चितकर्माणां विचारः, जन्मकुण्डल्या द्वादशभावेषु स्थितैर्ग्रहैः राशिभिश्चयोगाःसञ्चितकर्मणः फलं

सूचयन्ति । दशान्तर्दशादिभिः प्रारब्धस्य फलं ज्ञायते, तद्वदेव इदानीं यानि कर्माण्यस्माभिः क्रियतेऽथवा वयं भविष्यत्काले करिष्यामस्तेषां सर्वेषां क्रियमाणानां कर्मणां विचारस्ताजिकशास्त्रेण, प्रश्नेन, गोचरपद्धत्या च कर्तुं शक्यते । इत्थं जातकशास्त्रे, प्रश्नशास्त्रे, गोचरशास्त्रे, ताजिकशास्त्रे च होराशास्त्रस्यैः प्रधानता अङ्गीकृताहोराशास्त्रीयविद्वद्भिः।अग्रे होराशास्त्रस्य विभागानां विचारः प्रस्तुतो वर्तते ।

## ४.८ होराशास्त्रस्य विभागः

ज्योतिर्विदः होराशास्त्रस्य पञ्चविभागं कृतवन्तः – (१) जातकम् (२) ताजिकम् (३) रमलम् (४) प्रश्नः (५) स्वप्नः । एतेषु सर्वातिशयित्वेन जातकस्य प्राधान्यम् अस्ति । अत एव होराशास्त्रमेव जातकशब्देन अभिधीयते, यथोच्यते कल्याणवर्मणा-

**जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा ।**

**अथवा दैवविमर्शनपर्यायः खल्वयं शब्दः ।।**[109]

यत्र जन्मकालग्रहनक्षत्रतिथिराश्यादीनाम् आधारेण फलादेशः क्रियते तज्जातकम् उच्यते । बृहज्जातकादयो ग्रन्थाः जातक-सम्बद्धाः सन्ति । यत्र गोचरस्य आधारेण फलादेशो भवति तत् ताजिकम् उच्यते । ताजिक-नीलकण्ठीप्रभृतयः ग्रन्थाः ताजिकसम्बन्धाः सन्ति । यत्र प्रस्तारेण शुभाशुभफलविवेचनं यत्र भवति तत्प्रश्नशास्त्रमुच्यते । प्रश्नसारेत्यादयो ग्रन्थाः प्रश्नशास्त्रसम्बद्धाः सन्ति ।

---

[109]सारावली २/४

स्वप्नदर्शनानुसारं शुभाशुभफलनिरूपणं स्वप्नशास्त्रे क्रियते । स्वप्नाध्यायेत्यादयः ग्रन्थाः स्वप्नशास्त्रसम्बद्धाः सन्ति ।

### ४.८.१ जातकशास्त्रम्

'जनि प्रादुर्भावे' अर्थात् प्रादुर्भावार्थक जन धातोः जातक शब्दो निष्पद्यते । जन धातोः स्वार्थे कन् अथवा कः प्रत्यये वा 'जातक' शब्दो निष्पद्यते । अत्र कः प्रत्यये शिशुरूपस्य जातकस्य बोधो भवति । एवं जातकमधिकृत्य कृतं शास्त्रं जातकमित्युच्यते। अत्र जातकशब्दे कन्प्रत्ययो वर्तते अर्थात् जातकस्य सद्यः प्रसूतबालकस्य आधानजन्मकालिकलग्नं वानुरुध्य तस्य समस्तानपि जीवनवर्ति शुभाशुभघटनानां बोधार्थं कृतं फलितशास्त्रं जातकमित्युच्यते। इत्थं यस्मिन् शास्त्रे जन्मकालिकग्रहनक्षत्रादीनां स्थितिम् आधारीकृत्य गृहीतजन्मनो जनस्य गत-वर्तमान-भाविनां कालानां शुभाशुभफलविश्लेषणं क्रियते तदेव जातकशास्त्रम् उच्यते । आकाशस्थानां पिण्डानां भूलोकस्थैः मानवैः सह सम्बन्धोऽस्ति । सूक्ष्मदृष्ट्या अवलोकनेन इदं ज्ञायते यज्जनः यस्मिन् काले जन्म लभते तात्कालिकग्रहप्रकृत्यनूरूपा तज्जनस्य प्रकृतिर्भवति । यथा हि मेषराशौ जातो जनः जलाद् बिभेति । यतो हि मेषराशेः स्वामी भौमः स च जलविमुखोऽस्ति । इत्थम् एव सिंहराशेः स्वामी सूर्योऽस्ति । सिंहराशौ जातो जनः निश्चयम् एव पित्तप्रकृतिको भवति गगने ये तारकाः दृश्यन्ते ते दूरतः समानाः सन्ति किन्तु तेषाम् आभ्यन्तरभागे महद् अन्तरं भवति ।केचन अतिस्थूलाः, केचन अतिकृशाः, केच ज्योतिर्मयाः, केचन च ज्योतिर्विहीनाः अल्पज्योतिष्काः वा सन्ति । ये स्थिरः दृश्यन्ते ते नक्षत्रशब्देन ज्ञायन्ते, ये च गतिशीलास्सन्ति ते ग्रहशब्देन अभिधीयन्ते । पाराशरशास्त्रे यथा-

**आकाशे यानि दृश्यन्ते ज्योतिर्बिम्बान्यनेकशः ।**

**तेषु नक्षत्रसंज्ञानि ग्रहसंज्ञानि कानिचित् ।।**

**तानि नक्षत्रनामानि स्थिरस्थानि यानि वै ।**

**गच्छन्तो नक्षत्रनामानि गृह्णन्ति सततं ये तु खेचराः ।।**[110]

गगनं वस्तुतः अविभाज्यम् अस्ति तथापि ज्योतिर्विद्भिः सम्पूर्णं ज्योतिश्चक्रं सप्तविंशतिभागेषु विभक्तम् अस्ति, ते सर्वेऽपि भागाः स्वप्रकृत्यनुसारं नाम्ना आहूताः ते नक्षत्राणि उच्यन्ते । नक्षत्राणां चत्वारः पादाः सन्ति । इत्थं सप्तविंशतिनक्षत्रेषु अष्टोत्तरशतसंख्याकाः पादाः सन्ति । द्वादशराशिषु प्रतिनवपादम् एको राशिः कल्पितः द्वादशसंख्याकाः मेषादयो राशयो भवन्ति ।

जातकस्य जन्मकाले यो राशिः क्षितिजस्य पूर्वभागे भवति सः तस्य लग्नराशिः भवति । लग्नराशेः आरभ्य द्वादशराशयः परिगण्यन्ते । राशाधिपतीनां ग्रहाणाम् अवस्थानाम् अपि तदनुकूलं ज्ञायते । एतच्चक्रं जन्मकुण्डलीशब्देन व्यवह्रियते । राशयः क्रमेण स्वभोगानुसारं सूर्योदयराशितः आरभ्य पूर्वस्यां दिशि भवन्ति इत्थं तेषामपि प्रत्यहोराचक्रं भ्रमति । यदि कश्चन जातकः सिंहराशौ पूर्वस्यां दिशि प्राप्ते जन्म लभते तदा तस्य सिंहराशिरेव लग्नं भवति, ततः आरभ्य भावगणना क्रियते-

---

110 पाराशरहोराशास्त्रम् ३/२-४

**चक्रं**




अत्र अङ्कमाध्यमेन भावानां निर्देशनं कृतम्, न तु राशेः । अग्रे राशीनाम् अङ्कक्रमेण मेषादयो राशयः इत्थं ज्ञातुं शक्यन्ते –

चक्रं




उक्तप्रकारेण यस्मिन् राशौ ये ये ग्रहाः भवन्ति तेषाम् अवस्थितिः तद्राशौ निर्दिश्यते ।

**होराशास्त्रप्रभेदस्य जातकशास्त्रस्य विकासात्मकं विवेचनं समुपस्थापयिष्यते–**

जातकशास्त्रस्य समुपयोगित्वादेव ज्योतिषशास्त्रस्य प्रचारः प्रसारश्च लोकेऽस्मिन् विशिष्टतया समभवत् । मानवः लोकेऽस्मिन् जन्म लभते, जन्मकालाद् आरभ्य मृत्युकालपर्यन्तं तस्य जीवने विविधाः शुभाः अशुभा वा घटनाः विघटन्ते, याभिः सः अवश्यमेव प्रभावितो भवति । 'दैवाधीनं जगत्सर्वम्' इति तथा 'ग्रहास्ते

देवतांशकाः' इति वचनात् सम्पूर्णमपि जगत् ग्रहाधीनमस्ति । वस्तुतः सूर्यरश्मिसंयोगादेव सम्पूर्णं जगदिदं सञ्जातम् । अतो लोकेऽस्मिन् प्राप्तजन्मनां प्राणिनाम् उपरि सूर्यादिग्रहाणां रश्मिप्रभावो जायत एव । सूर्यादिग्रहाणां प्रकृत्यनुकूलं तस्यापि प्रकृतिः निश्चिता भवति । शुभग्रहाणां प्रभावेण सः शुभत्वं वहति । अशुभग्रहाणाञ्च प्रभावेण सः अशुभत्वं वहति । ग्रहाणां यादृशे योगे प्राणिनां जन्म भवति, तदनुकूलं तस्य शुभाशुभफलनिर्धारणं भवति । अस्मिन् जगति मानवानां श्रेयोमार्गप्रदर्शकाः वेदाः सन्ति । वेदेषु निरूपितविषयान् अवलम्ब्य एव लोकोऽयं प्रवर्तते । वेदेषु प्रतिपादिततत्त्वानाम् उचितज्ञानार्थं, तदङ्गानाम् शिक्षा-कल्प-निरुक्त-छन्दो-व्याकरण-ज्योतिषाख्यानाम् अध्ययनम् आवश्यकम् अस्ति अतो भास्कराचार्येण सिद्धान्तशोरोमणिग्रन्थे प्रतिपादितं यत्-

**शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ ।**

**या तु शिक्षायं वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैः बुधैः ।।**[111]

वेदरूपस्य नेत्ररूपं ज्योतिषशास्त्रं विना लोकस्यास्य श्रेयोमार्गः कथमपि न सम्भवति । ज्योतिषस्य लोकोपकारितवरूपेण तत्प्रभेदस्य होरास्कन्धान्तर्गतजात-कशास्त्रस्य महान्महत्त्वमस्ति । अतो जातकशास्त्रस्य पृथग्विषयरूपेण अध्ययनं कथं प्रारभत तस्य च विकासः कथं समभवदितिविषये जातकशास्त्रसम्बद्धानां विवि-धग्रन्थानां साहाय्येन विवेचनमत्र क्रियते ।

### ४.८.२ जातकशास्त्रस्य स्वरूपम्

ज्योतिषाचार्यैः होराशास्त्रं पञ्चधा विभक्तम्- जातकम्, ताजिकम्, रमलम्, प्रश्नः, स्वप्नश्च । पञ्चस्वेतेषु जातकस्य प्राधान्याद् कदाचिद् होराशास्त्रमेव

---

[111]सि.शि. म.अ.श्लो.-१०

जातकशास्त्ररूपेण प्रसिद्धिम् अवाप्नोत् । यतो हि जातकहोरयोः मध्ये अभेदं निरूपयन् कथयति कल्याणवर्मा-

**जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा ।**

**अथवा दैवविमर्शनपर्यायः खल्वयं शब्दः ।।**[112]

अर्थात् लोकेऽस्मिन् प्रसिद्धं जातकशास्त्रं यद्वर्तते तदेव होराशास्त्रम् अस्ति । अथवा होरेतिशब्दः भाग्यविचारस्य पर्यायवाचित्वेन गृह्यते । यत्र जन्म-काल-ग्रह-नक्षत्र-तिथि-राश्यादीनाम् आधारेण फलविवेचनं भवति तज्जातकम् उच्यते । नभोगतानां पिण्डानां भूस्थैः जनैः सह सम्बन्धः सहसा नैव ज्ञायते, किन्तु द्वयोर्मध्ये अविच्छेद्यसम्बन्धो भवति । उक्तञ्चास्ति- **ग्रहैर्व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम् ।** ग्रहाणाम् अनुकूलता-प्रतिकूलतावशात् तत्सम्बन्धितो जनस्यापि आनुकूल्यं प्रातिकूल्यञ्च विघटेते । आकाशे ये तारकाः दृश्यन्ते ते दूरतः समप्रकृतिकाः दृश्यन्ते किन्तु तेषाम् आभ्यन्तरभागे महद् अन्तरम् अस्ति । केचन ज्योतिर्मन्तः, अपरे ज्योतिर्विहीनाः केचन च चलमानाः अपरे स्थिराः सन्ति । ये स्थिरत्वं वहन्ति ते नक्षत्रसंज्ञया अभिधीयन्ते ये च गतिमन्तः ते ग्रहखेट-खेचरेत्यादिभिः शब्दैः ज्ञायन्ते।

पाराशरशास्त्रे उक्तम् अस्ति-

**आकाशे यानि दृश्यन्ते ज्योतिर्बिम्बान्यनेकशः ।**

**तेषु नक्षत्रसंज्ञानि ग्रहसंज्ञानि कानिचित् ।।**

**तानि नक्षत्रनामानि स्थिरस्थानानि यानि वै ।**

---

[112]सारावली २/४

**गच्छन्तो भानि गृह्णन्ति सततं ये तु खेचराः ।।**[113]

यद्यपि सम्पूर्णमपि नभोमण्डलम् अखण्डम् अस्ति तथापि ग्रहाणां स्थितेः अध्ययनाय ज्योतिषाचार्यैः सप्तविंशतिभागेषु समस्तं ज्योतिषचक्रं विभक्तम् । केचन अष्टाविंशतिभागेष्वपि विभागं कुर्वन्ति । प्रत्येकं भागाः स्वप्रकृत्यनुसारं तदभिधानेन आहूताः त एव नक्षत्राणि उच्यन्ते, तानि निरयणमानेन उत्तराभाद्रपदातः पूर्वाभाद्रपदापर्यन्तानि मन्यन्ते । सायनमानेन च शतभिषानक्षत्रादारभ्य धनिष्ठापर्यन्तानि अभिधीयन्ते । नक्षत्राणां सर्वमाःअत्य अष्टाधिकशतसंख्याकाः पादाः भवन्ति । द्वादशराशिषु समस्तपादानां विभाजने कृते सति प्रतिराशि नवपादाः आगच्छन्ति । निरयणमानेन द्वादशराशयः मीनतः कुम्भपर्यन्ताः परिगण्यन्ते । सायनमानेन च कुम्भतो मकरपर्यन्ताः परिगण्यन्ते । जातकशास्त्रे नक्षत्रराशिग्रहाणां स्वस्ववर्णजातिलिङ्गान्यपि समुक्तानि सन्ति । तदाधारेणैव जातकस्य शुभाशुभग्रहफलत्वं निर्णीयते ।

### ४.८.३ जातकशब्दस्यार्थः

जातकेतिशब्दः 'जनि प्रादुर्भावे' इति धातोः क्तप्रत्यये कन्प्रत्यये च सति निष्पन्नः अस्ति । अस्य शब्दस्य अर्थः भवति 'गृहीतजन्मा प्राणी' इति । कालान्तरेऽयं नवजातशिशुरूपार्थे प्रयुक्तोऽभवत् । गृहीतजन्मनः प्राणिनो जन्मकालाधारेण ग्रहनक्षत्रतिथिराश्यनुकूलं फलविवेचनं यत्र शास्त्रे क्रियते तदेव जातकशात्रम् उच्यते।

### ४.८.४ जातकशास्त्रस्य महत्त्वम्

जातकशास्त्रस्य महत्त्वं जातकग्रन्थेषु बहुधा प्रतिपादितमस्ति । सारावलीग्रन्थे कर्ता कथयति-

---

[113]पा.हो.शा. ३/२-४

**अर्थार्जने सहायः पुरुषाणामापदर्णवे पोतः ।**

**यात्रासमये जातकमपहाय नास्त्यपरः ।।**[114]

**निजानि भाग्यान्यवगन्तुमुच्चैरापत्पयोराशिमपि प्रतर्तुं ।**

**द्रव्यं तथोपार्जयितुं जनानां होरां विना नान्य इहास्त्युपायः ।।**[115]

**वर्णावली या लिखिता विधात्रा ललाटपट्टे भुवि मानवानाम् ।**

**होरादृशा निर्मलया यथावत् ता दैवविन्निर्णयतीह नान्यः ।।**[116]

पूर्वोपार्जितानां शुभाशुभकर्मफलानां लेखनं ब्रह्मणा मानवस्य ललाटपट्टे क्रियते । जातकशास्त्रेण तत्फलमेव प्रकाश्यते ।

### ४.८.५ जातकशास्त्रस्य विकासः

लग्नग्रहाधारेण फलादेशप्रक्रिया कदा प्रारब्धा इति ज्ञातुं न शक्यते किन्तु जन्मकालाधारेण राशिनक्षत्रग्रहाणां स्थितिवशात् फलकथनप्रक्रिया अतीव प्राचीना अस्ति । प्राच्यकाले नक्षत्रविद्या विशिष्टज्ञानप्राप्तये अभिमता आसीत् किन्तु नक्षत्रविद्याद्वारा आजीविकासञ्चालनं नितान्तमेव गर्हितम् आसीत् । मनुस्मृतिग्रन्थे नक्षत्रविद्यया आजीविकासञ्चालको जनः अपाङ्गतयः (साहचर्यरहितो) अभिमतः । यथोक्तम् –

[114]सारावली २/५

[115]जातकसारदीप १/८

[116]जातकसारदीप १/९

**नोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।**

**नानुशासनवादाभ्यां भिक्षां लिप्सेत् कर्हिचित् ।।**[117]

उत्पातेन केनचित् कारणेन वा नक्षत्रविद्यया अनुशासनवादाभ्याञ्च आजीविकां न गृह्णीयादिति ।

यथा ज्योतिषस्य सिद्धान्तस्कन्धो मौलिकः अस्ति तथैव जातकस्कन्धोऽपि मौलिकतां भजते । बृहज्जातकादिग्रन्थेषु बहवः प्राचीनाः जातकशास्त्रसम्बद्धाः ग्रन्थाः उल्लिख्यन्ते । नारदकश्यपवशिष्ठपराशरभृगुप्रभृतिभिः ऋषिभिः जातकशास्त्राणि प्रणीतानीति मन्यते । अधुनापि पाराशरभृगुजैमिनिप्रणीताः कतिपये फलितज्योतिषग्रन्थाः प्राप्यन्ते । पौरुषेयग्रन्थेषु वराहमिहिरस्य बृहज्जातकं, लघुजातकं, योगयात्रा चेति ग्रन्थाः प्रसिद्धाः सन्ति । पृथुयशोविरचिता षट्पञ्चाशिका, कल्याणवर्मविरचिता सारावली, केशवस्य जातकपद्धतिः, वैद्यनाथविरचितः जातकपारिजातः, ढुण्ढिराजविरचितं जातकाभरणम्, जीवनाथविरचितं भावकुतूहलम्, बलभद्रविरचितं होरारत्नञ्चेत्यादिकाः प्रसिद्धाः जातकशास्त्रसम्बद्धाः ग्रन्थाः सन्ति ।

### ४.८.६ जातकशास्त्रस्य विषयाः

जातकशास्त्रे जातकसम्बद्धाः समेऽपि विषयाः आगच्छन्ति । राशिनिरूपणम्, राशीशविवेचनम्, ग्रहाणां त्रिकोणादिनिरूपणम्, ग्रहाणां शतांशचक्रनिरूपणम्, भावनिरूपणम्, ग्रहस्वरूपगुणविवेचनं, ग्रहाणां वर्णविशेषनिरूपणम्, ग्रहाणां दृष्टिदिग्बल-ऊर्ध्वादिदृष्टि-मैत्रीविवेचनम्, ग्रहाणां भावकारकत्वञ्चेति विषयाः मुख्यरूपेणात्र विविच्यन्ते । वियोनिजन्मज्ञानप्रकारनिरूपणम्, निषेक-गर्भधारण-

---

[117]म.स्मृ. ६/५०

गर्भसम्भव-योगादीनां विचारः, विविधयोगानां निरूपणम्, ग्रहाणाम् अरिष्टत्वम्, जातकस्य मरणयोगः, जाग्रताद्यवस्थाः, आयुर्दायनिरूपणम्, जातकसम्बद्धानां विविधरोगयोगानां निरूपणम्, राजयोगः, द्रव्यादिग्रहाणां योगः, मान्द्यादिफलम्, ग्रहाणाम् अष्टकवर्गफलम्, ग्रहास्थितिवशाद् भावानां शुभाशुभादिनिरूपणम्, भावेभ्यः विचारविवेचनम्, ग्रहाणां तत्तद्विषय-दृष्ट्या महादशान्तर्दशा-प्रत्यन्तर्दशानिरूपणम्, दशानां फलविवेचनञ्चेतिविषयाः मुख्यत्वेन जातकशास्त्रे निरूप्यन्ते ।

### ४.८.७ जातकशास्त्र(फलितज्योतिष)स्य वैज्ञानिकता

दैवज्ञानाम् असत्यभविष्यवाण्या एवञ्च फलितयोगानां उपपत्ति अनुपलब्धित्वात् केचन अविमृश्यभाषिणः फलितज्योतिषमिथ्याविज्ञानम् इति कथयन्ति । परं अद्वितीयज्योतिषशास्त्रस्योपरि अनया रीत्या आक्षेपं कुर्वाणः, निन्दाकुर्वाणः, वास्तविकतायाः शरणं ग्रहीष्यन्ति चेद् न तदा पुनः कदापि आक्षेपं कर्तुं निन्दां कर्तुं दुःसाहसं करिष्यन्ति । सहस्राब्दैः चलत् आगच्छत् अस्य ज्योतिषशास्त्रानुसार्म सुविचार्यैव कृतदैवज्ञानां भविष्यवाण्यः अव्यभिचारिण्यः, सफलाः अस्य शास्त्रस्य वैज्ञानिकतायाः प्रथमं प्रमाणमस्ति ।

ज्योतिषशास्त्रस्य वैज्ञानिकं स्पष्ट्यर्थं सङ्केतकर्तृन् तर्कान् प्रति एवञ्च घटनाः प्रति विदुषां ध्यानाकर्षणं कुर्मः । ग्रहनक्षत्रे ब्रह्माण्डसम्बन्धिपदार्थैः निर्मितानि जातानि तथैव अपि मानवाः तैः पदार्थैः एव निर्मितपिन्दानि सन्ति । अतः इदं निश्चितमस्ति यद् तानि प्राणिमात्राणि ग्रहाणां द्वारा प्रभावितानि भवन्त्येव । यद्यपि दैवज्ञाः ग्रहयोगानां उपपत्तिं दातुं न शक्नुवन्ति तथापि तैः उपलब्धपरिणामम् एव वैज्ञानिकतायाः संर्थनं करोति । ज्योतिषसिद्धान्तानां उपपत्तिः स्वगहनतायाः कारणेन अद्यावधिपर्यन्तं मानवस्य बुद्धिक्षेत्रे नागता, परन्तु एतत्तु दृश्यते यत्

विज्ञानस्य शीघ्रप्रगतिः, दुर्गतिश्च एवञ्च विशेषतया 'नाक्षत्रभौतिकी'विषये उच्चतम अनुसन्धानं फलितज्योतिषस्य दृढग्रन्थीः उद्घाटयिष्यति, येन इदं शास्त्रं निश्चितरूपेण भविष्यत्काले स्वदुरूह-कठिन-सिद्धान्तानाम् उपपत्तिं स्पष्टयिष्यति ।

### ४.८.८ ताजिकशास्त्रम्

यथा जातकं होराशास्त्रस्य महत्त्वपूर्णम् अङ्गम् अस्ति । तथैव ताजिकमपि महत्त्वाधायकं वर्तते । ताजिकं नाम वार्षिकादीनानाविधफलादेशनिरूपकं शास्त्रमिति । संस्कृतेऽनुवादं कृत्वा कतिचिद् विद्वांसः "तार्तायकं" शास्त्रमपि कथयन्ति तथा केचित् ताजिकं कथयन्ति । हायनरत्ने उक्तम् अस्ति-यवनाचार्येण पारसीकभाषायां प्रणीतं ज्यौतिषशास्त्रैकदेशरूपं वार्षिकादिनानाविधफला-देशफलकशास्त्रं ताजिकशब्दवाच्यं तदनन्तरभूतैः समरसिंहादिभिः...... । जातकभूषणपद्धतौ ताजिकशब्दस्य निरूपणं कृतमस्ति । यथा-

**गर्गाद्यैर्यवनैश्च रोमकमुखैः सत्यादिभिः कीर्तितम् ।**

**शास्त्रं ताजिकसंज्ञकं ................................।।**[118]

अत्र स्पष्टीकर्तुं शक्यते यत् ताजिकशास्त्रं यवनादागतं, यवनशास्त्रसम्बद्धं, यवनाचार्यैर्वा आविष्कृतम् अस्ति । किमर्थं ताजिकमिति अपेक्षायां ज्योतिषशास्त्रे जातककुण्डल्यानुसारं जातकस्य सम्पूर्णजीवनस्य फलकथनं भवति, परम् एतावता दीर्घकालिकफलकथनं बुद्धौ न स्फुरति तदर्थं सूक्ष्मदर्शी ज्ञानम् आवश्यकं तदैव ताजिकशास्त्रस्य उद्भवः बभूव । शङ्करबालकृष्ण दीक्षितेन प्रतिपादितमस्ति यद्धोरास्कन्धस्यैव द्वितीयं नाम जातकमासीत्, अग्रे गत्वाऽस्य विभागद्वयं जातम्। उपर्युक्तविषया यस्मिन्नङ्गे आगतास्तदङ्गं जातकमाभूत्, द्वितीयमङ्गञ्च

[118]जातकभूषणपद्धतिः

ताजिकमभवत्। कस्यचित् व्यक्तेर्जन्मकालाद् आरभ्य यस्मिन् समये सौरवर्षस्य काचित् संख्या समाप्ता भूत्वा नवीनवर्षमारभते, तत्कालीनलग्नमाधारीकृत्य तत्कालिकैर्ग्रहैः तस्य वर्षस्य शुभाशुभनिश्चयः सामान्यतः ताजिकशास्त्रस्य मुख्यविषयो वर्तते । अस्यां पद्धत्यां जन्मलग्नस्य'मुथहा' इति नाम विधाय सोऽप्येकोग्रहोऽङ्गीकृतो वर्तते । केचन ग्रन्थकाराः 'ताजिक' शब्दस्य संस्कृतं रूपं 'तातीयकं' प्रतिपादयन्ति। यवनानां प्राबल्यकालाद्(१२०० शकासन्नः कालः) अस्माकं देशे ताजिकाङ्गं तेषां ग्रन्थेभ्य आगतः ।[119]अर्थात्ताजिकशास्त्रे वर्षकुण्डलीं निर्माय फलकथनं प्रवदन्ति आचार्याः, तत्र विशेषतया षोडशयोगानामाधारिकृत्य फलकथनं भवति । के ते योगः ? इति जिज्ञासायां प्रोक्तं यथा-

**प्रागित्थकालो पर इन्दुवारस्तथेत्थशालोऽपर ईसराफः ।**

**नक्तं ततः स्याद्यमया मणाऊ कबूलतो गैरिकबूलमुक्तम् ।।**

**खलासरं रद्दमथो दुरफालिकुत्थं च दुत्थोत्थवीरनामा ।**

**तम्वीरकुत्थौ दुरफश्च योगः स्युः षोडशैषां कथयामि लक्ष्म ।।**[120]

ताजिकशास्त्रस्य यवनसम्बद्धता एतावती एव यच्छास्त्रमिदं यवनेषु अधिकं प्रचलितम् आसीत् । गर्गादिमुनिभिः प्रणीताः ताजिकग्रन्थाः, सत्याचार्यनिर्मिताः ताजिकशास्त्रग्रन्थाश्च इदानीं न उपलभ्यन्ते, तथापि तद्ग्रन्थेभ्यः गृहीताः उद्धरणविशिष्टाः यत्र कुत्र प्राप्यन्ते एव । प्रमाणमस्ति यत्- वराहमिहिरः सत्याचार्यम् आदरेण स्मरति । सोऽपि स्वग्रन्थे ताजिकशास्त्रस्य स्मरणं करोति ।

---

119 भारतीय ज्योतिष, शङ्करबालकृष्ण दीक्षित, पृ. ९

120 ताजिकनीलकण्ठी षोडशयोगाध्यायः, श्लो.-१५-१६, पृ. ११०

सामान्यरूपेण ताजिकशास्त्रे संज्ञातन्त्रं, वर्षतन्त्रं, प्रश्नतन्त्रञ्चेति त्रयः विषयाः निरूपिताः सन्ति, किन्तु त्रिषु विषयेषु वर्षतन्त्रम् अस्य प्रधानविषयोऽस्ति ।

**४.८.८.१ मानवजीवने** **ताजिकशास्त्रस्योपयोगिता**

वर्षफलनिर्माणविधिः ताजिकशास्त्रे वर्णिताऽस्ति। अस्य शास्त्रस्य प्रचारो भारते यवनसभ्यतासम्पर्कागमनेन जातः । प्राचीने भरते वर्षपत्रस्य विचारो जातकग्रन्थाधारेण विंशोत्तरी-अष्टोत्तरीत्यादीनां दशानां विभागानुसारं क्रियते स्म । किन्तु यवनानां कृते जातकशास्त्रस्यैषा प्रक्रिया रुचिकरा न जाता, अतो नूतना प्रणाली रचिता, यत्रप्रतिवर्षस्य पृथक् फलं ज्ञायते स्म, तथा च प्रतिवर्षे नवग्रहाः फलदानस्याधिकारिणोऽपिएको प्रधानग्रहः वर्षेशः कथितः ।[121]जातकस्य जन्मकालीनः सूर्यो यस्यां राश्यां अंशकलादिषु भविष्यति, तद्राशावेव यदा सूर्यः तास्वंशकलादिषु पुनरागच्छति तदा जन्मनः एकः सौरवर्षो भवति, एवमेव यदा कदापि भ्रमणद्वारा जन्मनः सूर्यराश्यादितुल्यो भविष्यति तदैवायुषः एकं वर्षं पूर्णं भविष्यति । तत्कालीनं लग्नं तथा ग्रहैर्निर्मिता कुण्डली च मानवस्य वर्तमानवर्षस्य शुभाशुभं दर्शयिष्यति। एषैव ताजिकपद्धतिः कथ्यते ।वर्षफले वर्षेशः को ग्रहः स्यात्, अस्यां प्रक्रियायां मुन्थानान्तरं त्रिराशिपतिनिर्णयः क्रियते, यस्य विषये ताजिकग्रन्थस्य सूत्रं प्रस्तूयते । यदनुसार्म यदि जातकस्य वर्षप्रवेशो दिने स्यात्तदा मेषादिवृश्चिकपर्यन्तानां लग्नानां स्वामिनः त्रिराशीशाःक्रमशः सूर्यः, शुक्रः, शनिः, शुक्रः, गुरुः, चन्द्रः, बुधः, भौमः च भवन्ति । यदि वर्षप्रवेशो रात्रौ स्यात्तदा मेषादिवृश्चिकपर्यन्तानां लग्नानां त्रिराशीशाः क्रमशः- गुरुः, चन्द्रः, बुधः, भौमः, सूर्यः, शुक्रः, शनिः शुक्रः चभवन्ति। धन्वादिमीनपर्यन्तानां लग्नानां चतुर्णां लग्नानां

[121] भारतीय ज्योतिष- द्वारा डॉ. नेमिचन्द शास्त्री, ताजिक विचार एवं भारतीय कुण्डली विज्ञान- द्वारा मीठाराम हिम्मतराम ओझा, भाग-३, वर्ष गणित साधन प्रकरण

त्रिराशीशाः सर्वदैव शनिः, भौमः, गुरुः, चन्द्रः च भवन्ति । एवमेव शेषाणां पञ्चाधिकारिणां निर्णयं कृत्वा ग्रहाणां पञ्चवर्गीयबलस्य निर्णयः क्रियते विद्वद्भिः। यस्यान्तर्गतानि- ग्रहबलम्, उच्चबलम्, हद्दाबलम्, द्रेष्काणबलम्, नवमांशबलञ्च मुख्यानि सन्ति । पञ्चवर्गीबलनिर्णये सति यो ग्रहः सर्वबली लग्नञ्च पश्यति स एव वर्षेशः कथ्यते । ताजिकशास्त्रे लग्नस्य स्वामी लग्नेशः, शेषाणां स्वामिनो कार्येशाः कथ्यन्ते । अनयोर्योगेन षोडशयोगः जायन्ते । एवम्प्रकारेण वर्षेषमाध्यमेन षोडशयोगाधारेण च ताजिकशास्त्रपद्धत्या मानवः स्वजीवने घट्यमानानांशुभाशुभफलानां सूक्ष्मातिसूक्ष्मरूपेण फलज्ञानं कर्तुं शक्यते । शास्त्रमिदं प्रतिपलं सूचयत्यस्मान् यत्- कुत्र कार्ये साफल्यमसाफल्यं सम्भाव्यते, किं कार्यं कदा भविष्यति, कस्य सहयोगस्यावश्यकता भविष्यति, तत्र कियती सफलता मिलिष्यतीति सर्वं ताजिकशास्त्रेणैव ज्ञायते । विवाहसम्बन्धिप्रश्नाः, भूमिसम्बन्धिप्रश्नाः, रोग-शत्रुसम्बन्धिप्रश्नाःतथा चान्यसर्वेषां प्रश्नानां समाधानार्थं ताजिकशास्त्रमत्यन्तोपयोगि अस्ति ।

### ४.८.९प्रश्नशास्त्रम्

प्रश्नशास्त्रं होराशास्त्रस्य अपरम् अङ्गम् अस्ति । प्रश्नलग्नम् आधारीकृत्य फलादेशकथनं यस्मिन् शास्त्रे क्रियते तदेव प्रश्नशास्त्रम् उच्यते । वस्तुतः प्रश्नशास्त्रं जातकशास्त्रे ताजिकशास्त्रे च परिषिष्टरूपेण विवेचितम् अस्ति, किन्तु शास्त्रस्यास्य स्वतन्त्रग्रन्थाः अपि प्राप्यन्ते । प्रश्नशास्त्रस्योत्पत्तिविषये ताजिकनीलकण्ठीग्रन्थे उक्तम् अस्ति यत्-

**दैवज्ञस्य हि दैवेन सदसत्फलवाञ्छया ।**

**अवश्यं गोचरे मर्त्यः सर्वः समुपनीयते ।।**

**अश्रौषीच्च पुरा विष्णोर्ज्ञानाय समुपस्थितः ।**

**वचनं लोकनाथोऽपि ब्रह्मा प्रश्नादिनिर्णयम् ।।**[122]

प्रश्नशास्त्रस्य आर्षग्रन्थरूपेण प्रश्ननारदी वर्तते ।

## ४.८.१०रमलशास्त्रम्

निर्दिष्टेषु कोष्ठकेषु अन्यतमस्य स्पर्शे सति या स्थितिर्घटते तस्यानुसारं फलकथनं यत्र भवति तदेव रमलशास्त्रमुच्यते । रमलशास्त्रं पाशकविद्यानाम्नाऽपि अभिधीयते। प्राचीनकाले रमलशास्त्रं प्रश्नविद्यायाः अङ्गरूपेण यवनेषु विकसितम् आसीत्। रमलशास्त्रस्य प्राचीनत्वे सिद्धीकृते सति भट्टोत्पलस्य रमलग्रन्थः सर्वप्रथमं गृह्यते । अनेकैः विद्वद्भिः रमलशास्त्रसम्बद्धाग्रन्थाः विरचिताः किन्तु परमसुखोपाध्यायस्य रमलनवरत्नग्रन्थः प्राप्तख्यातिः अस्ति । अयं ग्रन्थः द्वाविंशत्युत्तरसप्तदशशत (१७२२)मितशकाब्दे प्रणीतः । अस्मिन् ग्रन्थे नवरत्नानां निरूपणं कृतम् अस्ति । यथा- संज्ञा-बलाबल-प्रश्नापकरण-प्रश्नकथन-अवधिकथन-मुष्टिकथन-मूकप्रश्न-चौरनामकथन-वर्षपत्रकथनञ्चेति । इत्थं रमलशास्त्रमपि जातकशास्त्रवल्लोकोपकारित्वं वहति ।

## ४.८.११ स्वप्नशास्त्रम्

सुप्ते सति याः चेष्टाः सञ्जायते ताः स्वप्नेति नाम्ना अभिधीयन्ते । दृष्टस्वप्नम् आदाय यः फलादेशः क्रियते तदेव स्वप्नशास्त्रत्वेन अभिधीयते । स्वप्नशास्त्रम् अन्यशास्त्राणाम् अङ्गरूपेण विकसितम् अस्ति। स्वतन्त्ररूपेणापि अस्य विवेचकाः ग्रन्थाः प्राप्यन्ते।

## ४.९ होराशास्त्रस्य विशिष्टाः आचार्याः

[122]ताजिकनीलकण्ठी, प्रश्नतन्त्राध्याये श्लोकः-१,२

होराशास्त्रस्य नैके विशिष्टाः आचार्याः सञ्जाताः येषां विशिष्टग्रन्थप्रणयनेन ज्योतिषशास्त्रं प्रसिद्धिम् अवाप्नोत् । केषाञ्चन आचार्याणां परिचयः अधः प्रदीयमानोऽस्ति ।

### ४.९.१ वराहमिहिरः

वराहमिहिरः ज्योतिषशास्त्रस्य सिद्धान्त-संहिता-होरेतिस्कन्धत्रयं विभज्य स्पष्टीकृतवान् । ज्योतिषशास्त्रस्य स्कन्धपक्षे पञ्चसिद्धान्तिका, जातकार्णवश्चेति । संहितापक्षे बृहत्संहिता, समाससंहिता, योगयात्रा चेति । होरापक्षे बृहज्जातकं लघुजातकञ्चेति ग्रन्थाः आचार्येणानेन विरचिताः । अयम् आचार्यः त्रिष्वपि स्कन्धेषु ग्रन्थान् रचितवान् किन्तु फलितज्योतिषे विशिष्टतां वहति । अस्य प्रसिद्धः बृहज्जातकमिति ग्रन्थः बहुभिः परवर्तिविद्वद्भिः व्याख्यातोऽस्ति ।

### ४.९.२ कल्याणवर्मा

कल्याणवर्मा पञ्चशत (५००)मितशकाब्दम् अभितः सञ्जातः । तस्य 'सारावली' इति प्रसिद्धो ग्रन्थोऽस्ति । कल्याणवर्मा स्वजन्मस्थानविषये ग्रन्थरचनाकालविषये च न किमपि लिखितवान् अस्ति । सारावलीग्रन्थस्यारम्भे स्वविषये कथयति-

**देवग्रामपुरप्रपोषणबलाद् ब्रह्माण्डस्त्वत्पञ्जरे ।**

**कीर्तिहंसविलासिनीव सहसा यस्येह भात्यातता ॥**

**श्रीमद्व्याघ्रपदीश्वरो रचयति स्पष्टां स सारावलीं ।**

**होराशास्त्रविनिर्मलीकृतमनाः कल्याणवर्मा कृती ॥**[123]

---

[123]सारावली १/५

श्लोकेनानेन ज्ञायते यत्सः देवग्रामनामके नगरे जनिं लब्ध्वा सम्पूर्णेऽस्मिन् ब्रह्माण्डे स्वकीर्तिं प्रसारितवान् । श्रीमद् व्याघ्रपदीश्वरः कल्याणवर्मा होराशास्त्रेण निर्मलीकृतमनाः जातः । इदानीं 'सारावली' इति ग्रन्थं रचयन् अस्ति ।

### ४.९.३ समरसिंहः

समरसिंहः ताजिकशास्त्रस्य प्रामाणिकः आचार्यः अस्ति । अस्य 'ताजिकतन्त्रसारः' इति ग्रन्थः ताजिकशास्त्रस्य विशिष्टः ग्रन्थोऽस्ति ।

### ४.९.४ वैद्यनाथः

वैद्यनाथः पञ्चाशदधिकत्रयोदशशत (१३५०)मितशकाब्दम् अभितः सञ्जातोस्ति इति अनुमीयते । वैद्यनाथस्य 'जातकपारिजात' इति प्रसिद्धो जातकग्रन्थोऽस्ति । जातकपारिजातेतिग्रन्थः अन्वर्थाभिधानोऽस्ति, यतोहि अत्र सर्वेऽपि जातकविषयाः विस्तरेण विवेचिताः सन्ति ।

### ४.९.५ नीलकण्ठः

नीलकण्ठः अनन्तदैवज्ञसुतः आसीत् सः ताजिकनीलकण्ठी तोडरानन्दश्चेति ग्रन्थद्वयं विरचितवान् । ताजिकनीलकण्ठी सर्वत्र प्रसिद्धः सम्मानितश्च ग्रन्थोऽस्ति । ताजिकनीलकण्ठीग्रन्थस्य रसालाद्याः अनेके टीकाग्रन्थाः सन्ति ।

### ४.१० होराशास्त्रस्य विशिष्टाः ग्रन्थाः

होराशास्त्रस्य विशिष्टग्रन्थानां परिचयः प्रदीयमानोऽस्ति- लग्नादिग्रहाऽऽद्यारेण फलादेशप्रक्रिया कदा प्रारम्भा इति तु न ज्ञायते परन्तु एषा प्रक्रिया नितान्तप्राचीना अस्ति इति शास्त्रावलोकनतो ज्ञायते । वाजसनेयीयसंहितायां नक्षत्रदर्शस्य (३०/१०) गणकस्य (३०/२०) चोल्लेखो दृश्यते । एवमेव छान्दोग्योपनिषद्यपि (७/१/२,७/७/१) नक्षत्रविद्यायाः उल्लेखः दृश्यते ।

कथ्यते यत् नारदकश्यपवसिष्ठपराशरभृगुप्रभृतिमुनिभिः जातकशास्त्राणि प्रोक्तानि प्रणितानि वा आसन् । सम्प्रति पाराशरभृगुजैमिनीप्रणितत्वेन कतिपय फलितज्योतिषग्रन्थाः लभ्यन्ते परन्तु तेषां रचनाशैली विषयाश्च अर्वाचीना एव प्रतिभान्ति । पौरुषेयग्रन्थेषु वराहमिहिरस्य बृहज्जातकं,लघुजातकं,योगयात्रा, कल्याणवर्मणः सारावलि, केशवस्यजातकपद्धतिः, गणेशदैवज्ञस्य जातकालङ्कारः, वैद्यनाथस्य जातकपारिजातः, ढुण्ढीराजस्य जातकाभरणम्, जीवनाथस्य भावकुतूहलम्,बलभद्रस्य होरारत्नश्च केचन प्रसिद्धाः ग्रन्थाः सन्ति । अथैतेषां संक्षिप्तपरिचयः अत्र प्रदीयते ।

## ४.१०.१ बृहत्पाराशरहोराशास्त्रम्

बृहत्पाराशरहोराशास्त्रं पराशरमुनिप्रोक्तत्वेन प्रसिद्धः होराग्रन्थः स्ति । ग्रन्थस्यास्य उपसंहाराध्याये प्रोक्तञ्यच्छास्त्रमिदं ब्रह्मणा नारदाय प्रदत्तं, तदेव नारदः शौनकादिभ्यः ऋषिभ्यः समुक्तवान्, शौनकादिऋषिभ्यः पराशरमुनिः प्राप्तवान् शास्त्रमिदम् । ततश्च पराशरः मैत्रेयाय प्रोक्तवान् । पराशर-मैत्रेयसंवादाऽऽधारितः ग्रन्थः पश्चाद्वर्तिना केनापि दैवज्ञेन संगृह्य विलिखितः । मुम्बईतः काशीतश्च प्रकाशितयोः संस्करणयोः मध्ये महान् पाठभेदः दृश्यते । अस्मिन् ग्रन्थे अष्टनवतिमिताः अध्यायाः सन्ति । ग्रन्थस्य काशीसंस्करण सीतारामाख्येन दैवज्ञेन १८५० अष्टषष्ठ्युत्तरअष्टादशमितश काब्दे सम्पाद्य प्रकाशितः । अस्मिन् ग्रन्थे सर्वेऽपि जातकसम्बन्धविषयाः निरूपिताः । ग्रन्थेस्मिन् यद्विवेचितमस्ति तदुपसंहाराध्याये विवर्णितं यथा-

**सृष्टिक्रमोवताराश्च गुणाः खेटस्य भस्य च ।**

**विशेषलग्नं वर्गाश्च तद्विवेकश्च राशिदृक् ॥**

**अरिष्टं तद्विभङ्गश्च विवेको भावजस्तथा ।**

**भावानाञ्च फलाध्यायो भावेशोत्थफलं तथा ।।**

**अप्रकाशफलं स्पष्टखेटदृष्टिप्रसाधनम् ।।**

**ततः स्पष्टबलाध्यायः इष्टकष्टप्रसाधनम् ।**

**पदश्चोपपदं तद्वदर्गला त्वथ कारकाः ।।**[124]

पाराशरहोराशास्त्रस्य लघुरूपं मध्यमरूपञ्च प्रकाशितं दृश्यते । लघुरुपं लघुपाराशरी उड्डुदायप्रदीपः वा कथ्यते । बृहत्पाराशरहोराशास्त्रस्य वचनानां साररुपेण लघुपराशरीग्रन्थस्य रचना जाताः । यथोक्तं-

**वयं पाराशरी होरामनुसृत्य यथामतिः ।**

**उडुदायप्रदीपाख्यं कुर्मो देवमुदां मुदे ।।**[125]

लघुपाराशरीरग्रन्थे संज्ञाध्यायः, योगाध्यायः, आयुर्विचाराध्यायः, दशाफलाध्यायः मिश्रकाध्यायश्चेति पञ्चाध्यायाः पञ्चचत्वारिंशत् श्लोकाश्च सन्ति । ग्रन्थोऽयं केन कदा पुनः प्रणित इति तु न ज्ञायते । अस्मिन् ग्रन्थे मुख्यतयाः ग्रहाणां दशाफलवर्णनं कृतमस्ति । इदानीमपि सर्वे ज्योतिर्विदाः अस्य ग्रन्थस्य नियमानुसारेणैव दशाफलानि कुर्वन्ति । वराहमिहिरः स्वकीये बृहज्जातकग्रन्थे शक्तिपूर्वः इति नाम्ना पराशरं स्मरति ।

## ४.१०.२ बृहज्जातकम्

---

[124]बृहत्पाराशरहोराशास्त्रम्

[125]लघुपाराशरी

वराहमिहिरविरचितः बृहज्जातकमिति ग्रन्थः ज्योतिषशास्त्रप्लवत्वेन गृह्यते । विशिष्टेस्मिन् ग्रन्थे अष्टाविंशतिसंख्याकाः अध्यायाः सन्ति । ग्रन्थस्यास्य वैशिष्ट्यमस्ति यदत्र विषयाः संक्षिप्ततया स्पष्टतया च काव्यरूपेण प्रस्तुताः सन्ति । अस्य ग्रन्थस्य बहवः टीकाग्रन्थाः सन्ति । भट्टोत्पलस्य विवृतिः प्रामाणिकी प्राचीना च टीका अस्ति । बृहज्जातके संगृहीताः जातकविषयाः ग्रहाणां राशीनां च स्वभावान् व्यञ्जयन्ति । ये खलु तत्तद्राशिवशेन तत्तद्राशीशवशेन वा मानवजीवने प्रतिफलन्ति । ते च व्यक्तिगतशुभाशुभ फलनिर्देशकाः सन्ति । पुरातने भारतीयज्योतिषे बृहज्जातके अश्विनी नक्षत्राधिष्ठित मेषादि राशितः एव राशिगणना एवं च अश्विनी नक्षत्रत एव नक्षत्रगणना दरीदृश्यते ।तद्वदेव प्राच्यज्योतिषे मनुजस्य जन्मकालिकचन्द्रनक्षत्रतः दशाफलविपाकाः विहिताः सन्ति । किन्तु बृहज्जातके दशाफलविपाकाः सर्वथा एतस्मात् भिन्ना एव । तद्यथा- लग्नार्कशशांङ्कानां मध्यादेकस्य दशा आदौ परिकल्प्या । ततस्तस्य केन्द्रस्थास्तेषां दशाः परिकल्प्याः । तैः केन्द्रस्थैः प्रथमवयसि फलं दत्तं भवति । यदुक्तं- “प्रथमवयसि मध्येऽन्त्ये च दद्युः फलानि” इति तथा च यवनेश्वरः ।

**पूर्वे तु केन्द्रोपगताः फलन्ति मध्ये वयः पणफरनिविष्टाः ।**

**आपोक्लिमस्थाः फलदावयोऽन्त्ये यथाबलं स्वं समुपैति पूर्वम् ।।126।।**

### ४.१०.३ लघुजातकम्

लघुजातकम् इति ग्रन्थः वराहमिहिरचितबृहज्जातकग्रन्थस्यैव सारसंक्षेपोऽस्ति । अत्र राशिप्रभेदः, ग्रहभेदः, ग्रहमैत्री, ग्रहाणां स्वरूपम्,

---

[126]बृहज्जातकम्, ८/१, पृ. १५४-१५५

गर्भाधानादिसूतिकाप्रकरणम्, अरिष्टभङ्गः, अरिष्टविचारः, दशान्तर्दशेत्यादयो विषयाः निरूपिताः सन्ति ।

### ४.१०.४ सारावली

यवनहोराशास्त्रस्य विषयसंकलनस्वरूपान्वर्थनामा सारावली आचार्यकल्याणवर्णना ५५७ ई. वर्षे विरचितोऽस्ति । ग्रन्थेऽस्मिन् चतुःपञ्चाशत् संख्याकाः अध्यायाः, सार्धद्विसहस्रश्लोकाः सन्ति । ग्रन्थेऽस्मिन् जातकशास्त्रसम्बद्धाः विषयाः सविस्तरं निरूपिताः सन्ति । ग्रन्थेऽस्मिन् राशि-काल-पुरुष-ग्रह-वर्षाधान-ग्रहजलज्ञान-अरिष्टनाश-ग्रहयुतीफल-भाग्यभावविचार-राजयोग-दशान्तर्दशा-वियोनिजन्म-प्रस्तारचक्रादिविषयाः विशिष्टरूपेण निरूपिताः सन्ति । इत्थं हि नैके होराशास्त्रसम्बद्धाः ग्रन्थाः सन्ति येषां योगदानेन शास्त्रमिदं विशिष्टां प्रथितिम् अलभत । फलितविषयकानयप्रसिद्धाः ग्रन्थाः सन्ति- श्रीपतिपद्धतिः, रत्नावली, रत्नसारः, रत्नमाला, रत्नसारश्चेति । श्रीपतिना रचितानां ग्रन्थानां टीकाकारेण पद्मसूरिणा १२९४तमे ई.वर्षे भुवनदीपकनामा परमोपादेयलघुश्च ग्रन्थोऽलेखि । नरेन्द्रोपाध्यायस्य १३२४ तमेऽब्दे खेष्टे स्थितस्य जातकवृत्तिः, प्रश्नशतकं, प्रश्नचतुर्विंशतिका, जन्मसमुद्रः, लग्नविचारः, ज्योतिषप्रकाशः च वर्तन्ते । १४५६तमे वर्षे केशवेन कृताः ग्रहकौतुकं, वर्षग्रहसिद्धिः, तिथिसिद्धिः, जातकपद्धतिः, जातकपद्धतिविवृत्तिः, ताजिकपद्धतिः, सिद्धान्तवासनापाठः, मुहूर्ततत्त्वम्, गणितदीपिका इत्यादयः ग्रन्थाः उल्लेखनीयाः वर्तन्ते । तदुपरि नृसिंहदैवज्ञस्य पुत्रेण ढुण्ढिराजेन १५४१ ई. वर्षे 'जातकाभरणम्' ग्रन्थो लिखितः, अयं ग्रन्थः आकृत्या यथा महान् तथैव विषयमहिम्नाऽपि महानस्ति । तद्वदेव आनन्ददैवज्ञपुत्रेण नीलकण्ठदैवज्ञेन ताजिकनीलकण्ठी निर्मिता । नीलकण्ठानुजस्य रामदैवज्ञस्य मुहूर्तचिन्तामणिरपि प्रसिद्धो ग्रन्थः विद्यते, अस्मिन् ग्रन्थे

श्रीपतिरत्नमालायाः प्रभावः परिलक्ष्यते । गोविन्ददैवज्ञेन मुहूर्तचिन्तामणेः 'पीयुषधारा' टीकाऽलेखि । मुहूर्तमार्तण्डस्य रचयिता नारायणपण्डितस्य स्थितिकालः १५७१ तमः ई. वर्षः मन्यते । तदुपरि होराशास्त्रस्य ग्रन्थानां नैके टीकाकाराः सन्ति किन्तु विषयवैविध्यमभिलक्ष्य वा पिष्टपेषणमभिलक्ष्यात्र विवेचनं नाकृतम् ।

## ४.११होराशास्त्रे ग्रहाणां बलाबलविचारः

### ४.११.१ होराशास्त्रे ग्रहाणांपरिचयः

व्युत्पत्तिः व्याकरणदृष्ट्या- "ग्रह उपादाने" इत्यस्माद् धातोः ग्रहशब्दः निष्पद्यते, अथवा "गृह्णाति फलदातृत्वेन जीवान् इति ग्रहः" वा ग्रहः नाम गृह्णाति इति ग्रहः । "गच्छन्तो भानि गृह्णन्ति सततं ये तु ग्रहाः ।"[127] 'विभाषा ग्रहः' इति पाणिनिसूत्रेण विकल्पेन णप्रत्यये प्राप्ते व्यवस्थितविभाषामाश्रित्य ज्योतिषि वाच्ये गृह्णाति इति ग्रहः रूपं सिद्ध्यति । स्वप्रभावात् शुभाशुभफलप्रदानेन विगृह्णन्ति नियन्त्रयन्ति इति वा सूर्यादीनां ग्रहः इति व्यपदेशः । गृह्यन्ते स्वगत्या द्वादशभानि यैः ते ग्रह इति व्युत्पत्या आकाशे सततं चलायमानाः प्रत्यक्दिशः पूर्वदिशं प्रति ग्रहाः आत्मीयप्रभावं चराचरजगतः उपरि वितन्वन्ति एव, अर्थात् सूर्योद्भासिताः बिम्बाः ग्रहापदवाच्याः, तेन सर्वेषां भूम्यन्तरिक्षगतजीवानां जीवनाकाशात्मकशक्तिमत्वं ग्रहत्वमिति । सूर्योद्भासिताः बिम्बाः ग्रहपदवाच्याः, तेन सर्वेषां भूम्यन्तरिक्ष-गतजीवानां जीवनाकाशात्मकशक्तिमत्वं ग्रत्वामिति । ग्रहाधीनं जगत्सर्वमित्युक्त्या ग्रहैः सहास्माकं नित्यं सम्बन्धस्तिष्ठति । ज्योतिषशास्त्राधारेण नवग्रहाणां

---

[127]बृहत्पाराशरहोराशास्त्रम्, अ.-३, श्लो.-४

शुभाशुभस्थितिमाध्यमेन मानवजीवनस्य जातकजीवनस्य वा सम्पूर्णकार्य-प्रक्रियाणां सञ्चालनं भवति । ग्रहप्रभावैः सम्पूर्णमानवजीवनं प्रभावितम दृश्यते । ग्रहाणां माध्यमेन सम्पूर्णसृष्ट्यां चलाचल-जन्माजन्म-गतागत-सर्वेषां परीक्षणं निरीक्षणञ्च भवति । ग्रहकारनासेव मानवेभ्यो सुख-दुःख-कष्ट-हानि-लाभालाभसर्वविधफलानि भवन्ति । यदाऽपि ग्रहाणां स्थितिः प्रतिकूला भवति तदा किमपि कार्यं सफलतां न प्राप्नोति । सर्वासु प्रक्रियासु सर्वदैव स्थितिः ग्रहाधीना भवति । ग्रहाः मानवजीवने अनुकूलतायां वाञ्छितफलदातारः भवन्ति ।

**ज्योतिषदृष्ट्या-** ग्रह नाम सञ्चरणशीलतारकाणि एव परं तानि सञ्चरणशीलतारकाणि आचार्यैः “ग्रह” इत्यभिधानेन उच्यन्ते । ग्रहाः निरन्तरं सूर्यं परितः भ्रमन्तः स्थानपरिवर्तनमपि कुर्वन्ति ।

**विशेषदृष्ट्या-** परम् आकाशमण्डले यानि प्रकाशान्वितानि वा ज्योतिष्पिण्डानि सन्ति तानि “तारकाणि” इत्युच्यन्ते । तत्र रारकाणां प्रकारत्रयमस्ति- (१) स्थिरतारकाणि (२) सञ्चरणशीलतारकाणि (ग्रहाः) (३) धूमकेतुतारकाणि (धूमकेतवः) ।

**स्थिरतारकाणि-** नाम एकस्मिन् स्थाने एव तिष्ठन्ति, स्थिरतारकाणि पर्थ्वीतः एवम् अन्यतारकादिभिः निश्चितदूरस्थानैव तिष्ठन्ति । स्थिरतारकाणि स्वकान्त्या स्वयं प्रकाशयुक्तानि वर्तन्ते, इमानि अगणितानि वा कोटिपरिमितानि सन्ति ।

सञ्चरणशीलतारकाणि- सञ्चरणशीलतारकाणि नाम नवग्रहाः । ये सततं सूर्यं परितः भ्रमन्ति, राशिपरिवर्तनमपि विदधति । “गृह्णाति फलदातृत्वेन जीवान् इति

ग्रहः” पूर्वक्त्या व्याख्यया राहु-केतु-सूर्य-चन्द्रमसः अपि ग्रहाः सन्ति इति स्वीकृतम् । परन्तु भारतीयज्योतिषशास्त्रानुसारं नवग्रहाणां स्वीकारः कृतः ते यथा-

(१) सूर्यः (२) चन्द्रः (३) मङ्गलः (४) बुधः (५) गुरुः (६) शुक्रः (७) शनिः (८) राहुः (९) केतुः इति । “सूर्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः । शुक्रः शनैश्चरो राहुः केतुश्चेति नव ग्रहाः ।।” चन्द्रः पृथिव्याः उपग्रहः अस्ति, परं सूर्यः पारिभाषिकदृष्ट्या स्वयं तारकः (Star) अस्ति । ग्रहाणां प्रकाशः तस्मिन् विषये केचन कथयन्ति यत् सर्वेषां ग्रहाणां स्वीयं तेजः वर्तते परं केचन “सूर्यप्रकाशेन ग्रहाः प्रकाशन्तेति” स्वीकुर्वन्ति । पृथ्वी चलति न सूर्यः इति विचारः मूलतः भारतीयः वर्तते। सर्वप्रथमं विश्वस्मिन् विश्वे आर्यभट्टेन कथितं यत् ‘पृथ्वी चलति न सदयश्चलन्ति’ इति । आर्यभट्टस्य पृथिव्याः गतिशीलताप्रतिपादकः श्लोकः अभ्यसनीयः अस्ति ।

एका अन्यापि व्याख्या क्रियते चेत् तदा तु पञ्चग्रहान् एव स्वीकर्तुं शक्नुमः । व्याख्या यथा- “गृह्णाति गतिविशेषान् वक्रानुवक्राकुटिलेति प्रभृतीन् इति ग्रहः” । अपि च सूर्यचन्द्रमसौ तारकौ स्तः, न तु ग्रहाविति । एवमेव राहुकेतू तमोगुणयुक्तौ छायारूपौ स्तः, न तु ग्रहौ । परं तथापि छायाग्रहौ उच्येते । यथा- नवग्रहेषु सूर्यचन्द्रमसोः वर्णनं वेदे बहुत्र प्राप्यते, पञ्चताराग्रहाणां भौमबुधगुरुशुक्रशनीनाञ्चोल्लेखः स्पष्टतया न प्राप्यते परं संकेतो बहुत्र विद्यते । राहुकेत्वोः छायाग्रहयोः प्रायशः सङ्केतोऽपि न दृश्यते, परं ग्रहणप्रसङ्गे ऋग्संहितायां स्वर्भानु इत्यादिना पाठः प्राप्यते । ऋग्संहितायाः पञ्चदेव, इति

प्रयोगः पञ्चग्रहवाचकत्वेनैवागत इत्यनुमीयते । अतः द्रवस्तुतिपरकर्क्षु ग्रहाणां वर्णनं वेदिकवाङ्मये दृश्यते । तद्धि- “देवगृहाः वै नक्षत्राणि” । महाभारते द्रोणपर्वणि ग्रहाणां संख्या पञ्चत्व-सप्तत्वमपि भासते, तत्र- “प्रजासंहरणे राजन् सोमं सप्तग्रहा इव।” परन्तु तथापि वयं भारतीयाः सूर्यचन्द्रादिनवग्रहान् एव स्वीकुर्मः । अधिकं किं “हर्षल”, “नेप्च्युन”, प्लुटो” इति नूतनग्रहत्रयं एव स्वीकुर्वन्ति । कारणं फलसंशोधनविषये अधुनापि एतेषां संशोधनं क्रियते ज्योतिर्विद्भिः । अतः नवग्रहसमेतहर्षलनेप्च्युनप्लुटो-आदयः ग्रहाः मुख्याः सन्ति ।

**धूमकेतवः-** आकाशमार्गात् कदाचित् अकाले अनवासरे इमे धूमकेतवः निस्सरन्ति भूमौ पतन्ति वा । एतान् प्रकाशपुञ्जयुक्ताः धूमकेतवः कथ्यन्ते । यदा धूमकेतोः पृथ्व्यां पतनं जायते तदा सामान्यतया जनाः अशुभमिति कथयन्ति ।

इत्थं ग्रहाः मूलरूपाः आधाररूपाः वा सन्ति इति भावः । ग्रहैः विना फलादेशः भवितुं नार्हति । भारतीयज्योतिषशास्त्रपरम्परानुसारं नवग्रहाः एवं च त्रयः उपग्रहाः वा नूतनग्रहाः सन्ति येषां स्वीकारः वैदेशिकाः (पाश्चात्याः) कुर्वन्ति । यद्यपि आकाशमण्डले अगनितग्रहाः सन्ति इति बहुवर्षपूर्वं संशोधय स्वीकृतमेव किन्तु पृथिव्यां निवसतां प्राणिनामुपरि अधिकाधिक प्रभावः येषां ग्रहाणां भवति तेषामेव ज्योतिषशास्त्रे प्राधान्यं, तेभ्यः ग्रहेभ्य एव प्रधानता दत्ता । ग्रहाणां प्राधान्यं फलप्राप्तये स्वीकरणीयमेव तस्मादुक्तम्-

**ग्रहा राज्यं प्रयच्छन्ति ग्रहा राज्यं हरन्ति च ।**

**ग्रहेषु (व्यापितं) व्यावृतं सर्वं त्रैलोक्यं सचराचरम् ।।**

ग्रहाः एव शुभाशुभफलम् अस्मान् सर्वान् दापयन्ति, यद्यपि सप्तग्रहाणामेव आकाशे पिण्डदर्शनं भवति, राहुकेत्वोः पिण्डमेव नास्ति, इमौ राहुकेतू छायाग्रहौ स्तः, अर्थात् छायारूपेण स्वीकृतौ वर्तेते। भचक्रे अनयोः पिण्डं न दृश्यते। अत्राधुना क्रमेण सर्वेषां ग्रहाणां परिचयप्रदानं क्रियते।

## ४.११.१.१ सूर्यः (सरति इति सूर्यः)

सौरमण्डलस्याधिष्ठाता सूर्य अग्नितत्वेन परिपूर्णः, जगतदिवसस्य दीपकः, स्वरश्मिभिः स्वर्गं, पृथ्वीम् अन्तरिक्षं च व्यापयति । यथाह- भगवान् वेदः- “आप्राद्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ।”[128] “तेजसां गोलको सूर्यः”। संस्कृते सूर्यस्य आदित्यादि-अनेकानि नामानि विद्यन्ते , अन्यभाषायां (आङ्ग्लभाषायां) सन (Sun), फारसीभाषायां शम्स्।

श्रीमद्भागवतानुसारं पृथ्वीस्वर्गान्तराले ब्रह्माण्डं केन्द्रस्थाने वर्तते, तत्रैव सूर्यस्य स्थितिः अस्ति। अस्मिन् ब्रह्माण्डखण्डे सूर्यः “वैराज”रूपे प्रतिष्ठितः अस्ति, तस्मात् कारणात् सूर्यः “मार्तण्डः” नाम्नापि सम्बुध्यते । अमरकोशे सूर्याय कृते “ग्रहपतिः” । इति विशेषणं प्रदत्तम् । सूर्य एव स्वमार्गं चलन् स्वगत्याधारेण अहोरात्रं (दिवसरात्रिं) ह्रस्वदीर्घां करोति, यदा अयं सूर्यः मेषराशौ वा तुलाराशौ भ्रमति तदा दिवसरात्रिः समाना जायते। परन्तु ज्योतिषशास्त्रानुसारं सूर्यः पर्थ्वीतः प्रायः सपादकोटिमाईल् दूरम् अस्ति। अयं सूर्यः बुधशुक्रादीन् ग्रहान् शक्त्या कर्षन्

---

[128]शुक्लयजुर्वेदः ७/४२

आत्मानं प्रदक्षिणी करोति ।[129]सूर्यः पर्थ्वीतः प्रायः त्रिलक्षगुणाधिकः बृहत् अस्ति । सूर्यः सदैव मार्गी उदितश्च ग्रहोऽस्ति । परं क्षितिजकारणेन अथवा पृथ्वीधुर्यां उपरम भ्रमणकारणेन कुत्रचित् उदितः कुत्रचित् अस्थ प्रतीयते, परं वास्तविकरूपेण अयं भ्रम एव । सत्यं तु एतदस्ति यत् सूर्यः न कदापि अस्तं गच्छति । सूर्यः समस्त जीवानाम् आत्मा, सर्वग्रहाणामधिष्ठाता, सर्वशक्तिमान् उक्तः ।

अयं सूर्यः जातकजीवनस्योपरि २२ द्वाविंशति: वर्षतः २४ चतुर्विंशतिः वर्षपर्यन्तं शुभाशुभफलम् अर्पयति । गोचरे अयं सूर्यः स्वराशिसङ्क्रमण-पञ्चदिनपूर्ववदेव स्वप्रभावं प्रकटयति अपि च प्रत्येकराशेः प्रारम्भिकभागे स्वफलप्रदानकार्यम् आरभते । अनात्मिकदृष्ट्या प्रशासकनृपमन्त्रिसेनानायका-विष्कर्तापुरातत्त्वविज्जनानां प्रतिनिधिरस्ति ।[130]

### ४.११.१.२ चन्द्रः

'चन्द्रमा मनसो जातः' इत्युक्तिरनुसारेण मनसः स्वामी चन्द्रो वर्तते । तदुपरि "आदित्याद्वै चन्दमा जायते ।" चन्द्रस्य चन्द्र-सोमेत्यादि-अनेकानि नामानि संस्कृते सन्ति । आङ्ग्लनाम- मून (Moon), फारसीनाम- माह अस्ति ।

पद्मपुरानानुसारं ब्रह्मापुत्रमहर्षिणा अत्रिणा स्वपितृ-आदेशपालनार्थं "अनुत्तर" नामकं तपः कृतम्, तपानान्तरं महर्षिअत्रेः नेत्राभ्यां जलबिन्दवः अपतन् तेभ्यः स्त्रीरूपदिशाभिः 'पुत्रप्राप्तिः' जाता, अनन्तरं स्वयं पितामहः तं तरुणं ब्रह्मलोकं नीत्वा तस्य नाम "चन्द्रमा" इति दत्तवान् । प्रचेतापुत्रदक्षप्रजापतिना स्व

---

[129]ज्यो.वि. पृ.सं.-१३८

[130]भा.ज्यौ. वै.वि., पृ.-३३

(२७)सप्तविंशतिः कन्यानां विवाहः चन्द्रमसा सह कृतः ता एव सप्तविंशतिनक्षत्राणि सन्ति । ग्रहोऽयं तीव्रगतियुक्तः वर्तते, अतः सूर्यस्यैकवर्षमार्गं अर्थात् एकराशिं एकमासे एवञ्च एकनक्षत्रं २.१/४ दिने पारं करोति । पृथिव्याः एक भागरूपचन्द्रः कालान्तरे स्वगुरुत्वाकर्षणशक्तिं त्यक्त्वा पथ्वीतः भिन्नः नभसि ग्रहस्वरूपेण सततं पृथ्वीं परिक्रमते(ति) । भारतीयज्योतिषमतानुसारं चन्द्रमा पृथिव्याः सर्वेभ्यः ग्रहेभ्यः तारकेभ्यश्च निकटतमः ग्रहो विद्यते । सूर्यवत् चन्द्रमा अपि नित्यं मार्गी उदितश्च ग्रहोऽस्ति । चन्द्रः कालपुरुषस्य मनः विद्यते । चन्द्रः जातकस्य जीवनोपरि (२४) चतुर्विंशतिः वर्षतः (२६) षड्विंशतिः वर्षायुषि स्वीयं अशुभं-शुभं च फलं ददाति । गोचरेऽयं प्रत्येकराषौ सङ्क्रमणावासरे अन्तघट्यां अर्थात् (१ होरा १२ द्वादशकलापर्यन्तं) स्वीयं विशिष्टं फलं ददाति । अनात्मिकदृष्ट्या श्वेतवर्णजलयानतत्स्थानमत्स्यजलद्रवपदार्थपरिचारिकाभोजनराजतादिपदार्थानां प्रतिनिधिरस्ति।[131]

### ४.११.१.३ भौमः(मङ्गलः)

क्रूरमतिभूपुत्रः भौमः युद्धस्य देवता (God of war) इति मन्यते । मङ्गलस्य भौमः, मङ्गलः, कुजेत्यादयः नामानि संस्कृते सन्ति । आङ्गलभाषायां मार्स (Mars)तथा च फारसीभाषायां मिरीरव इत्यादि नामानि सन्ति । पुराणेषु मङ्गलः, भूमिपुत्रेत्यादिनाम्ना परिचितोऽस्ति । ब्रह्माण्डपुराणे (२२/४८) भौमोत्पत्तिक्रमं निरूपितमस्ति, किञ्च सृष्टिप्रक्रियायां पञ्चभूतोत्पत्यनन्तरं तैजसः भौमोत्पत्तिरिति कथितं वर्तते । बुधात् द्विलक्षयोजनदूरं वर्तते, सः अवक्रगत्या भ्रमन्

---

131भा.ज्यौ.वै.वि., पृ.-३४

पञ्चचत्वारिंशत् दिनेष्वेव एकवारम् एकराशिं भ्रमति । तस्मात् सार्धैकवर्षं यावत् सम्पूर्णराशिचक्रं पारं करोति । मङ्गलस्य पृथ्व्या सह पुत्रत्वात् साम्यत्वमस्ति । ज्योतिषदृष्ट्या सामान्यतः सूर्यं परितः ६८७ दिवसेषु मध्ये वा वर्षद्वयमध्ये स्वीयं भ्रमणं पूर्णं विदधाति । रक्तवर्णयुक्तोऽयं द्वौ लघु-उपग्रहयुक्तो वर्तते। मानवशरीरे उदरतः पृष्ठभागपर्यन्तं नासिकाकर्णफुस्फुस तथा च शारीरिकबलादिषु अस्य अधिकारक्षेत्रं वर्तते । सूर्यचन्द्रवत् भौमः सदैव मार्गी न भवति, अपि तु समये समये मार्गी, वक्री, अस्तं च जायते । अस्य जातकस्य जीवनस्योपरि प्रायः (२८) अष्टाविंशतिवर्षतः (३२)द्वात्रिंशत्वर्षायुर्मध्ये स्वीयं शुभाशुभं फलं प्रकातयति । न्यायालय-अभियोग-विवादेषु, कलहेषु वा मङ्गलः बलयुक्तो स्वीकृतः । अनात्मिकदृष्ट्या सैनिकचिकित्सकाभियन्तारसायनज्ञालौहशस्त्रनिपुणयान्त्रिक-भूभवननिर्माताक्रीडासामग्रीणां च प्रतिनिधिरस्ति ।[132]

## ४.११.१.४ बुधः

रवेरत्यन्तसंनिहितो बुधः ग्रहेष्वयमल्पतमो विद्यते । बुधस्य- सौम्यः, चन्द्रपुत्रः, बुधेत्यादिनामानि संस्कृते सन्ति । आङ्ग्लभाषायां सः मर्क्युरी (Mercury) नाम्ना तथा च फारसीभाषायां त्तीर नाम्ना प्रसिद्धोऽस्ति । पुराणानुसारं 'बुधः' चन्द्रमा-रोहिणीपुत्रोऽस्ति, श्राद्धदेववैवस्वतमनोः पुत्री 'इला' बुधपत्नी वर्तते । तदुपरि "नारायणं बुधं प्राहुर्वेदज्ञानविदो बुध" इति वचनात् वेदशास्त्राणां विज्ञं बुध इत्युक्तः । आकाशमण्डले शुक्रात् बुधः द्विलक्षयोजनं दूरमस्ति, अस्य बुधस्य

[132] भा.ज्यौ.वै.वि., पृ.-३५

गतिरपि शुक्रवदेव भवति, यस्मिन्नवसरे बुधः सूर्यगतिं उल्लङ्घयन् राशिसञ्चरणं करोति तस्मिन् समये पृथिव्यां चक्रवातः अथवा अनावृष्टिभयम् उत्पद्यते । ग्रहमण्डलराज्ञा सूर्येण चन्द्रपुत्रबुधं बृहस्पतिदूतपद्म दत्वा तस्मै उधाय वक्तृत्वशक्तिः, गतिश्च प्रदत्ता इति । ग्रहमण्डले अस्मै 'राजकुमार'पदं प्राप्तमस्ति ।

स्वल्पोऽपि बुधः बहुप्रकाशवान् अस्ति, किन्तु सूर्यस्य अत्यन्तनिकटत्वात् सः स्पष्टतया न दृश्यते । मुख्यरूपेण ग्रहोऽयं व्यवसायस्य प्रतिनिधिग्रहः वर्तते । अयं जातकस्य जीवनस्योपरि प्रायः (३२) वर्षेभ्यः (३५) वर्षपर्यन्तावस्थायां स्वीयं शुभं वा अशुभं फलं प्रकटयति । गोचरसमये अयं स्वराषिसञ्चरणावासरे सप्तदिनपूर्वमेव फलप्रदानमारभते । व्यवसाय-वाक्-बुद्धिसम्बन्धिकार्येषु अस्य प्रधानबलं स्वीकृतम् । अनात्मिकदृष्ट्या विद्यालयशिक्षणविज्ञानमानवसृजनसाहित्यक्षेत्रप्रकाशनले-खनडाकपालवणिग्बुद्धिजीवीपारादिपदार्थानां च प्रतिनिधिरस्ति ।[133]

### ४.११.१.५ गुरुः

ग्रहेषु गुरुतमो गुरुरेवाऽस्ति । सर्वेषां ग्रहाणां द्रव्यमाःअत्य यावद् भवति तावदधिकद्रव्यवान् गुरुरीति ज्ञायते । गुरोः- बृहस्पतिः, सुरगुरः, जीवेत्यादिनामानि संस्कृते सन्ति । विदेशेषु "Baal of the Babylonias, Orisis of the Egyptians, Zeus of the Greeks, Thor of the Norse Mythology, Roman Jupiter" एतैः विशेषणैः प्रसिद्धोऽस्ति । पौराणिकदृष्ट्या कर्दमऋषेः पुत्री श्रद्धया सह अङ्गिरा'ऋषेः विवाहः अभूत्, तस्यैव गर्भात्

---

[133]भा.ज्यौ.वै.वि., पृ.-३६

'बृहस्पतेः' जन्म अभवत् । बृहत्संहितायां भटटोत्पलेनोक्तं यत्- "आदिसर्ग एव पितामहोऽङ्गिरसं मनसाभि जज्ञे।" नवविधकालमानेषु मध्यमगत्या संवत्सरवाहकोऽयं बृहस्पतिः । बृहस्पतेः स्थितिः मङ्गलात् उपरि द्विलक्षं (२०००००)योजनदूरं विद्यते, यदि अयं वक्रगत्या न चलेत् तदा एकराशिं एकस्मिन् वर्षे एव पारं करोति । आकारेणायं ग्रहः अन्येभ्यः महाकायः भारसमन्वितश्च वर्तते,अस्य व्यासः ९,८६,७२० मीलपरिमितः मन्यते । मन्येऽहं यत् अतिगुरुत्वात् एव अस्य नाम 'गुरुः'इतिदत्तंस्यात्। अनात्मिकदृष्ट्याव्यवसायकर्मपूजास्थानपूजकनेत्रीवर्गन्यायालयन्यायाधीशशिक्षा क्षेत्रसमितिदानोत्सवादीनांप्रतिनिधिर्वर्तते।[134]

नवांशवर्गः ग्रहाणां स्थितेः अत्यन्तसटीकं रूपं प्रस्तौति । यथा – यदि मीनलग्नस्य सूर्यः नवांशे वर्गोतमः स्यात् चेतस्य स्पष्टः अर्थः भवति सूर्यस्य रेखांशः ११५२६४० तः १२५०००० अस्य मध्यम स्यादिति । स्थूलरूपेण गुरुः एकस्मिन् राशौ एकवर्षं यावत् सञ्चरति, कालपुरुषस्य ज्ञानरूपेण प्रसिद्धोऽयं ग्रहमण्डले मन्त्रीपदं प्राप्तवान् । मानवदेहे कटिभागतः ऊरुपर्यन्तम् अस्य अधिकारक्षेत्रं, तथा च हृदयभागे, कफेत्यादिरोगेषु अस्य आधिपत्यं वर्तते । अयं गुरुः प्रसन्नतासुखसमृद्धीनां प्रतीकरूपोऽस्ति, लग्नस्थः वा केन्द्रस्थः बृहस्पतिः अतीव शुभफलदायको कथितः, उक्तञ्च- "किं कुर्वन्ति ग्रहाः सर्वे यस्य केन्द्रे बृहस्पतिः । मत्तमातङ्गयूथानां भिनत्येकोऽपि केसरी ।।" अयं जातकस्य जीवनस्योपरि प्रायः

---

[134]भा.ज्यौ.वै.वि., पृ.-३६

(१६)षोडश, (२२)द्वाविंशतिः, (४०)चत्वारिंशत् वर्षायुः मध्ये स्वीयं शुभं फलं प्रददाति। गोचरसमये गुरुः कस्मिन्नपि राशौ भ्रमणावासरे तस्मिन राशौ मध्यकाले स्वीयं शुभं फलं ददाति।

### ४.११.१.६ शुक्रः

शुक्रशब्दविग्रहे प्राप्यते यत् शुच् धातोः रन् प्रत्यये कृते सति शुक्रशब्दस्य निष्पत्तिः जायते, तस्यार्थो भवति ग्रहविशेषः इति । बुध इव शुक्रोऽपि रविसमीपवत्री ग्रहो विद्यते तथा चौदयिकनक्षत्रत्वेन सामयिकनक्षत्रत्वेन च दृश्यते, किन्तु न कदाप्यर्द्धरात्रौ दृश्यते। शुक्रस्य- कविः, काव्यः, दैत्यगुरुः, उशना, भृगुः, भार्गवेतादिनामानि संस्कृते सन्ति । आङ्ग्लभाषायां वीनसनाम्ना तथा च फारसीभाषायां जुहारो नाम्ना प्रसिद्धः शुक्रः पौराणिकदृष्ट्या महर्षिभृगोः पुत्रोऽस्ति। पाश्चात्यदेषेष्वयं “Goddess of art, Love, Beauty and Attraction” इत्यादिविशेषणैः प्रतितोऽस्ति । अयं एकनेत्रविहीनः, दैत्यगुरुश्चास्ति । ज्योतिषदृष्ट्या शुक्रः सूर्यात् ६७००००००मीलपरिमितं दूरमस्ति, अस्य व्यासः ७७००मीलं परिमितः अस्ति। कालपुरुषस्य गुप्ताङ्गे प्रभुत्वम् अवधारयति शुक्रः, तदार्थं सः कामेच्छायाः प्रतीकरूपोऽस्ति। ग्रहमण्डले अनेनापि मन्त्रिपद्म प्राप्तम् अस्ति, किन्तु स्त्रीग्रहत्वात् मन्त्रिभार्या इत्यपि पद्म प्राप्तवान् । जातकस्य जीवनस्योपरि प्रायः २५ (पञ्चविंशातिः)वर्षतः २८(अष्टाविंशातिः)वर्षाणि यावत् शुभाशुभप्रभावं प्रकटयति । गोचरावस्थायां शुक्रः कस्मिन् राशौ स्वसंक्रमणं एकसप्ताहपूर्वं फलप्रदानम् आरभते, स्वराषिमध्ये (राशेः मध्यभागे) सः विशेषफलं

ददाति । आत्मिकदृष्ट्या स्नेहसौन्दर्यानन्दशुभ्रताशुचिन्तातीक्ष्णमतिकार्यक्ष-मतादीनां प्रतिनिधिरस्ति। अनात्मिकदृष्ट्या शुभ्रवस्तून्यलङ्करणप्रियपदार्थनृ-त्य-गानवाद्यदृश्यपदार्थकलाप्रि-यदर्शनभोगोपभोगसामग्रीणां प्रतिनिधिर्वर्तते ।[135]

### ४.११.१.७ शनिः

गुरोरनन्तरमयं पृथुग्रहः शनिः वर्तते । शनेः- शनैश्चरः, मन्दः, अर्कपुत्रेत्यादिनामानि संस्कृते सन्ति। आङ्ग्लभाषायां सेटर्न तथा फारसीभाषायां सः केदवान नाम्ना प्रसिद्धोऽस्ति । पौराणिकदृष्ट्या सूर्यस्य द्वितीयभार्या 'छाया'गर्भेण शनेः प्रादुर्भावः जातः, अयं शनिः मन्दगत्या एकराशौ भ्रमणावासरे ३०त्रिंशत्माससमयं गृह्णाति, अपि च त्रिंषद्वर्षेषु संपूर्णं राशिचक्रं भ्रमति । ब्रह्माण्डपुराणे कथितमस्ति यत्- "महाग्रहो द्विजश्रेष्ठो मन्दगामी शनैश्चरः।" सूर्यं परितः परिक्रमणावसरे शनिः १०७५९.१/४ दिनानि समयावधिं गृह्णाति । मन्दगतिवशादेव सः मन्दनाम्ना प्रसिद्धो वर्तते। कालपुरुषस्य 'दुःखम्'इति रूपेण स्वीकृतः शनिः ग्रहमण्डले सेवकपदं प्राप्तवान् अस्ति। जातकस्य जीवनस्योपरि प्रायः (३२)द्वात्रिंशत् वर्षेभ्यः (४२)द्विचत्वारिंशत् वर्षपर्यन्तावस्थायां स्वीयं विशेषप्रभावं पातयति। गोचरसञ्चरणसमये राशिसञ्चरणषण्मासपूर्वमेव स्वप्रभावं प्रकटयति। एकस्मिन् राशौ शनिः ३०त्रिंशत् मासपर्यन्तं विचरति एवञ्च राशेः अन्तिमभागे पूर्णं फलं प्रददाति । अनात्मिकदृष्ट्या कृषकपत्रवाहकपशुपालक-कुम्भकारमठाधीश-

---

[135]भा.ज्यौ.वै.वि., पृ.-३७

कृपणदण्डाधिकारकसाधुगिरिकन्दरापाषाणप्रदेशानुर्वरकभूमिध्वंसावशेषश्मशाना दीनां प्रतिनिधिरस्ति ।[136]

### ४.११.१.८ राहुः

राहोः संस्कृतनामानि- सैंहिकेयः, स्वर्भानुः, क्रूरेत्यादयः सन्ति । आङ्ग्लभाषायां (Dragons head or the Ascending Mode) तथा फारसीभाषायां रासनाम्ना प्रसिद्धः वर्तते । पौराणिकदृष्ट्या हिरण्यकशिपोः 'सिंहिका'नाम्नः पुत्र्याः राहोः जन्म अभवत् । समुद्रमन्थनावासरे अयं दानवपुत्रः देवस्वरूपं धृत्वा देवपङ्क्तौ स्थित्वा अमृतं पीतवान्, परं तस्मिन्नवसरे सूर्यचन्द्राभ्यां भगवन्तं विष्णुं प्रति कृतसङ्केतेन विष्णुना सुदर्शनचक्रेण राहोः मस्तकं भिन्नं कृतम्, अनेन कारणेन राहोः छिन्नमस्तकस्य नाम 'राहुः' तथा देहस्य अन्यभागस्य कबन्धस्य नाम 'केतुः' इति प्रसिद्धिं प्राप्तवान् । तस्मादेव कारणात् राहुः सूर्यचन्द्रमाभयं वैरं धृत्वा अमावास्यायां-पौर्णिमायां च ग्रसति, तं जनाः सूर्यग्रहणम्, चन्द्रग्रहणं चेति ग्रहणद्वयेन जानन्ति । यद्यपि खगोलविदः आकाशे राहुकेत्वोः पिण्डं न स्वीकुर्वन्ति, ते तु राहुकेतू पृथिव्याः उत्तर-दक्षिणध्रुवयोः 'छाया' अस्ति इति स्वीकुर्वन्ति, अतः ज्योतिषशास्त्रे अनयोः अस्तित्वं छायाग्रहरूपेण एव स्वीकृतः । अयं राहुः 'कालपुरुषस्य दुःखरूपम्' अङ्गम् अस्ति तस्मात् दुःखशोकयोः राहुः प्रतीकं मन्यते । राहोः अधिकारः पादयोः अस्ति, जातकस्य जीवनस्योपरि ४२ द्विचत्वारिंशत्वर्षतः ४८ अष्टचत्वारिंशत्वर्षपर्यन्तावस्थायां सः स्वीयं प्रभावं

---

[136]भा.ज्यौ.वै.वि., पृ.-३७

दर्शयति, एक राष्यां १।। सार्धैकवर्षं यावत् राहु सञ्चरति । गोचरे सः मासपूर्वमेव स्वीयं शुभाशुभफलं प्रकटयति ।

### ४.११.१.९ केतुः

केतोः संस्कृतनामानि- शिखिन्, ध्वजेत्यादयः सन्ति । फारसीभाषायां जनब नाम्ना प्रसिद्धः केतुः राहुवदेव वर्तते । ग्रहमण्डले केतोरपि एकमपि पदं नास्ति । केतोः सर्वं फलमपि राहुवदेव वर्तते । तथा राहुः केतुः च एकशरीरस्यिव भागद्वयं वर्तते तस्मात् परस्परं मित्रभूतौ वर्तेते । यद्यपि जन्मकुण्डल्यां केतुः राहुतः सप्तमस्थाने एव भवति । अयं केतुः जातकस्य जीवनस्योपरि प्रायः ४८ अष्टचत्वारिंशत्वर्षेभ्यः ५४ चतुष्पञ्चाशत्वर्षाणि यावत् स्वीयं प्रभावं प्रकटयति । "एवं चन्द्रस्य यौ पातौ तत्राद्यो राहुसंज्ञकः । द्वितीयो केतुसंज्ञस्तौ ग्राहकौ चन्द्रसूर्ययोः ।"

### ४.१२ सूर्यादिग्रहाणां बलाबलविचारः

मानवस्य शुभाशुभफलादेशः ज्योतिषशास्त्रस्य आधारेण एव भवितुं शक्यते, कारणं यत् मानवजीवनस्य प्रथप्रदर्शनं ज्योतिषशास्त्रस्य फलितप्रभेदान्तर्गत-होरास्कन्धेनैव भवति । फलादेशस्य बहुविधप्रविधिषु जातकपत्रं फलादेशकथने अतीवोपयोगकरं सिद्ध्यति । यदा कस्यापि जातकस्य जन्मो भवति तत्समयेऽन्तरिक्षे ग्रहाणां स्थित्यादिकस्योल्लेखः जन्मपत्रिकायां भवति । फलादेशकथनात्पूर्वं गणिताधारेणस्पष्टग्रहाणां स्थित्यादिज्ञानाभावे जातकस्य शुभाशुभफलज्ञानं सम्यक्-तया कर्तुं न शक्यते । यथोक्तं भास्कराचार्येण-

**ज्योतिषशास्त्रफलं पुराणगणकैरादेश इत्युच्यते**

**नूनं लग्नबलाश्रितिः पुनरयं तत्स्पष्टखेटाश्रयम् ।**

**ते गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न ज्ञायते**

**तस्माद् यो गणितं न वेत्ति स कथं गोलाधिकं ज्ञास्यति ।।**[137]

एतेन निष्कर्षोऽयं समापतति यत् कुण्डल्यां स्पष्टग्रहबलादेव जातकस्य शुभाशुभफलस्य सिद्धिर्भवति । 'यात्राविवाहोत्सवजातकादौ खेटेस्फुटेरेव फलं स्फुटत्वम्'[138] इति भास्करोक्त्या स्पष्टमेव यत् सर्वेषु शुभाशुभकार्येषु दृग्गणितैक्याः स्पष्टग्रहा एव कारणम् । इमे ग्रहाः स्वबलेनैव जातकस्य जीवनं प्रभावयन्ति । ग्रहाणां बलाबलनिर्धारणेन एव समेषां तथ्यानां समुचितप्रकारेण विश्लेषणं कर्तुं शक्यते । स्वोच्चमूलत्रिकोणातिमित्रमित्रादिशुभपञ्चकग्रहयोगवशात् प्राप्तं शुभग्रहजं बलं भवति। शुभपञ्चकराशिषु स्थितः ग्रहः भावोपचयं विदधाति । यथोक्तम् – "मूलत्रिकोणोच्चसुहृदत्स्वकीयाधीष्टर्क्षमेतच्छुभपञ्चकं स्यात् ।"[139]"स्वगृहोच्चसौम्यवर्गे ग्रहः फलं पुष्टमेव विदधाति । नीचर्क्षरिपुगृहस्थो विगतफलः कीर्तितो मुनिभिः ।।"[140]

सूर्यादिग्रहाणां समस्तशुभाशुभस्य फलस्य निर्णयार्थं तेषां बलाबलस्य विचारो महत्त्वपूर्ण विषयो भवति । अर्थात् को ग्रहः कियद् बलवान् निर्बलो वा, अस्य सम्यग्ज्ञानेन विना फलादेशः कथयितुं न शक्यते । ग्रहाणां चतुर्विधानि बलानि-

---

[137]सिद्धान्तशिरोमणिः, गो.अ. श्लो.-७

[138]सि.शि. स्प.अ.अ. श्लो.-१

[139]भा.म. अ.-५, श्लो.-१

[140]सा.व. अ.-३४, श्लो.-१४

१ दिग्बलम्, २ स्थानबलम्, ३ कालबलम्, ४ चेष्टाबलम् । एतानि बलानि कस्यचिदपि ग्रहस्य बलाबलं निर्णेतुं सहयोगकारिणि भवन्ति । यथोक्तम्-

**दिक्स्थानकालचेष्टाकृतं बलं सर्वनिर्णयविधाने ।**

**वक्ष्ये चतुःप्रकारं ग्रहस्तु रक्तो भवेदबलः ।।**

सर्वेषां ग्रहाणां उच्चबलं सर्वस्वीकृतम्। बली-निर्बलग्रहलक्षणज्ञानानन्तरं फलादेशे स्थानबलविशेषस्यापि विचारोऽत्यावश्यको भवति । स्थानविशेषे स्थितत्वात् ग्रहाः विशिष्टं बलमपि धारयन्ति । यथा- "दशमेऽङ्गारको यस्य स जातः कुलदीपकः।"[141] अर्थात् दशमेऽवस्थितः नीचराशिगतोऽपि भौमः जातकस्य कृते शुभदो भवति । तद्वदेव केन्द्रस्थो (१-४-७-१०)गुरुः सर्वदैव शुभत्वमेति "किं कुर्वन्ति ग्रहाः सर्वे यस्य केन्द्रे बृहस्पतिः" इति। इत्थं स्थानबलं महत्त्वपूर्णमस्तीति ज्योतिर्विदः स्वीकुर्वन्ति। सूर्यस्य दिग्बलं प्रमुखं मन्यते, चन्द्रस्य पक्षबलं विशिष्टं स्वीक्रियते ज्योतिर्विद्भिः । यथा-

**तुङ्गस्थाबलिनोऽखिलाश्च शशिनः श्लाघ्यं हि पक्षोद्भवम्।**

**भानोर्दिग्बलमाह वक्रगमने ताराग्रहाणां बलम्।।**

**कर्क्युक्षाजघटालिगोहिरबलान्त्योक्षाश्विपाश्चात्यगः।**

**केतुस्तत्परिवेषधन्वसु बली चेन्द्वक्रयोगो निशि ।।**[142]

तद्ववद् परस्परं योगेनापि ग्रहाणां बलाभिवृद्धिर्भवति। वैद्यनाथेनाप्युक्तम्-

---

[141]सा.व. अ.-३४, श्लो.-१४

[142]फलदीपिका, अ.-४, श्लो.-५

**अर्केण मन्दः शनिना महीसुतः कुजेन जीवो गुरुणा निशाकरः ।**

**सोमेन शुक्रोऽसुरमन्त्रिणा बुधो चन्द्रः खलु वर्द्धते सदा ।।**[143]

सूर्यशनयोर्परस्परयोगेन शनैश्चरस्य स्वाभाविकं बलं वर्द्धते, शनिना भौमस्य, भौमन वाक्पतेः, बृहस्पतिना हिमद्युतेः, चन्द्रेण शुक्रस्य, शुक्रेण बुधस्य, सोमजेन चन्द्रस्य बलं वर्द्धते । चन्द्रबलं सर्वबलप्रधानमतः चन्द्रे बलिनि सति सर्वे ग्रहाः नित्यमेव बलिनो भवन्ति ।

### ४.१२.१ पञ्चवर्गीबलम्

होराशास्त्रस्येकः प्रभागः ताजिकशास्त्रमस्ति । ताजिकशास्त्रानुसारेण वर्षेशनिर्णयार्थं ग्रहाणां पञ्चवर्गीबलज्ञानमपेक्षते । अतोऽत्र ग्रहाणां पञ्चवर्गीबलनिर्द्धारणं क्रियते । पञ्चवर्गीबलेषु गृह-हद्दा-द्रेष्काण-नवांशोच्चबलानां गणना भवति । पञ्चवर्गीबलनिर्द्धारणे ग्रहबलानां मूल्यनिर्द्धारणं संख्यामाध्यमेन क्रियते । यथोक्तं ताजिकनीलकण्ठ्याम् –

**त्रिंशत् स्वभे विंशतिरात्मतुङ्गे हृदेक्षचन्द्रांशकं दृक्काणे ।**

**मुसल्लहे पञ्चलवाः प्रदिष्टाः विंशोपका वेदलवैः प्रकल्प्याः ।।**[144]

वर्षकुण्डल्यां ग्रहः गृहबले स्वराशौ ३०-०० बलम्, मित्रराशौ २२-३० बलम्, समराशौ १५-०० बलम्, शत्रुगृहे च ७-३० बलं प्राप्नोति । हद्दाबले स्वराशौ १५-०० बलम्, मित्रराशौ ११-१५ बलम्, समराशौ ७-३० बलम्, शत्रुगृहे च ३-४५ बलं प्राप्नोति । द्रेष्काणबले स्वराशौ १०-०० बलम्, मित्रराशौ ७-३० बलम्,

---

[143]जातकपारिजातः, अ.-२, श्लो.-६०

[144] ताजिकनीलकण्ठी, अ.-१, श्लो.-३९

समराशौ ५-०० बलम्, शत्रुगृहे च २-३० बलं प्राप्नोति । नवांशबले स्वराशौ ५-०० बलम्, मित्रराशौ ३-४५ बलम्, समराशौ २-३० बलम्, शत्रुगृहे च १-१५ बलं प्राप्नोति । पञ्चवर्गी-बलसाधने प्रत्येकस्य बलस्य साधनं पृथग्रूपेण कथं भवतीति पञ्चवर्गीबलकोष्ठकमाध्यमेन ज्ञायते-

## पञ्चवर्गीबलकोष्ठकम्

| | गृहबलम् | हद्दाबलम् | द्रेष्काणबलम् | नवांशबलम् |
|---|---|---|---|---|
| स्वगृहे | ३०-०० | १५-०० | १०-०० | ५-०० |
| मित्रगृहे | २२-३० | ११-१५ | ७-३० | ३-४५ |
| समगृहे | १५-०० | ७-३० | ५-०० | २-३० |
| शत्रुगृहे | ७-३० | ३-४५ | २-३० | १-१५ |

## वर्षप्रवेशकालिकाः स्पष्टग्रहाः

| ग्रहाः | लग्नस्पष्टम् | सूर्यः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|---|
| राशिः | ४ | ०० | १० | ३ | ०० | ११ | ०१ | ५ |
| अंशाः | २३ | २४ | २९ | २२ | ८ | ०१ | २३ | ४ |
| कलाः | १४ | ३७ | ३४ | ०१ | ५४ | २४ | ८ | १२ |

## वर्षलग्नम्




### ४.१२.१.१ गृहबलम्

सूर्यः वर्षकुण्डल्यां भौमस्य गृहे अस्ति, भौमश्च सूर्यस्य शत्रुः, अतः शत्रुगृहे सूर्यः ७/३० बलमाप्नोति। चन्द्रः शनैशचरस्य गृहे अस्ति, शनिः चन्द्रस्य समः, अतः समगृहे चन्द्रः १५/०० बलमाप्नोति । भौमः चन्द्रस्य गृहे अस्ति, चन्द्रश्च भौमस्य समः, अतः समगृहे भौमः १५/०० बलमाप्नोति। बुधः भौमस्य गृहे अस्ति, भौमश्च बुधस्य शत्रुः, अतः शत्रुगृहे बुधः ७/३० बलमाप्नोति । गुरुः स्वगृहे अस्ति, अतः स्वगृहे गुरुः ३०/०० बलमाप्नोति। शुक्रः स्वगृहे अस्ति, अतः स्वगृहे शुक्रः ३०/०० बलमाप्नोति। शनिः बुधस्य गृहे अस्ति, बुधश्चास्य समः, अतः समगृहे शनिः १५/०० बलमाप्नोति।

### ४.१२.१.२ उच्चबलम्

ग्रहास्योच्चबलबोधनार्थं नीचराशिन्यूनीकृते यदि षडधिको भवेत्तदा १२ संख्यया विशोध्य नवसंख्यया विभज्य ग्रहास्योच्चबलं भवति । आचार्यनेमिचन्दशास्त्रीमहोदयेन वर्षकालिकं ग्रहास्योच्चबलसाधनं सारणीमाध्यमेन

कृतम् ।[145] सर्वत्रैव सारणीत एव ग्रहास्योचबलसाधनं भवति । यस्य ग्रहास्योचबलं साध्यते तस्योच्चबलसारण्यां राश्यंशात्मकं फलं सारणीतः ग्रहीतव्यम् । अत्र पिष्टपेषण वशात् सारणी नैव प्रदत्ता ।

### ४.१२.१.३ हद्दाबलम्

हद्दाबले द्वादशराशिषु पञ्चभागात्मकस्य प्रतिखण्डस्य मानं भिन्नं-भिन्नं भवति । मेषराशेः प्रतिखण्डानि ६,६,८,५,५, सन्ति । प्रथमखण्डस्य षडंशस्याधिपतिः गुरुः, द्वितीयखण्डस्य षडंशस्याधिपतिः भृगुः, तृतीयखण्डस्याष्टांशस्याधिपतिः बुधः, चतुर्थखण्डस्य पञ्चांशस्याधिपतिः भौमः, पञ्चमखण्डस्याष्टांशस्याधिपतिः शनिरस्ति । एवमेवान्येषां राशिखण्डानां कियदंशात्मके सति कस्य ग्रहास्याधिपत्यं भवतीति हद्दाबलचक्रमाध्यमेन स्पष्टं भवति ।

**मेषादिराशीनां हद्देशाः**

| मेष | वृष | मिथुन | कर्क | सिंह | कन्या | तुला | वृश्चिक | धनु | मकर | कुम्भ | मीन |
|---|---|---|---|---|---|---|---|---|---|---|---|
| गुरुः ६ | शुक्रः ८ | बुधः ६ | मं. ७ | गुरुः ६ | बुधः ७ | शनिः ६ | मं. ७ | गुरुः १२ | बुधः ७ | शुक्रः ७ | शुक्रः १२ |
| शुक्रः ६ | बुधः ६ | शुक्रः ६ | शुक्रः ६ | शुक्रः ५ | शुक्रः १० | बुधः ८ | शुक्रः ४ | शुक्रः ५ | गुरुः ७ | बुधः ६ | गुरुः ४ |
| बुधः ८ | गुरुः ८ | गुरुः ५ | बुधः ६ | श. ७ | गुरुः ४ | गुरुः ७ | बुधः ८ | बुधः ४ | शुक्रः ८ | गुरुः ७ | बुधः ३ |
| मं. ५ | श. ५ | मं. ७ | गुरुः ७ | बुधः ६ | मं. ७ | शुक्रः ७ | गुरुः ५ | मं. ५ | श. ४ | मं. ५ | मं. ९ |
| श. ५ | मं. ३ | श. ६ | श. ४ | मं. ६ | श. २ | मं. २ | श. ६ | श. ४ | मं. ४ | श. ५ | श. २ |

145 भारतीयज्योतिष, नेमिचन्दशास्त्री, पृ. सं. ३७३-७९

उदाहरणकुण्डल्यां सूर्यः मेषराशौ चतुर्विंशत्यंशात्मकमस्ति, मेषराशौ विंशत्यंशतः पञ्चविंशत्यंशपर्यन्तं भौमस्य हद्दा भवति । चन्द्रः कुम्भराशौ एकोनत्रिंशदंशात्मकमस्ति, कुम्भराशौ पञ्चविंशत्यंशतः त्रिंशदंशपर्यन्तं शनैश्चरस्य हद्दा भवति। भौमः कर्कराशौ द्वाविंशत्यंशात्मकमस्ति, कर्कराशौ एकोनविंशत्यंशतः षड्विंशत्यंशपर्यन्तं बृहस्पतेः हद्दा भवति । बुधः मेषराशौ अष्टांशात्मकमस्ति, मेषराशौ षडंशतः द्वादशांशपर्यन्तं शुक्रस्य हद्दा भवति । गुरुः मीनराशौ एकांशात्मकमस्ति, मीनराशौ प्रथमद्वादशांशपर्यन्तं शुक्रस्य हद्दा भवति । शुक्रः त्रयोविंशत्यंशात्मकमस्ति, वृषराशौ द्वाविंशत्यंशतः सप्तविंशत्यंशपर्यन्तं शनैश्चरस्य हद्दा भवति। शनिः कन्याराशौ चतुरंशात्मकमस्ति, कन्याराशौ प्रथमसप्तांशपर्यन्तं बुधस्य हद्दा भवति। प्रस्तुतोदाहारणस्य हद्देशचक्रम्-

**हद्देशाः**

| ग्रहाः | सूर्यः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| हद्देशाः | भौमः | शनिः | गुरुः | शुक्रः | शुक्रः | शनिः | बुधः |

### ४.१२.१.४ द्रेष्काणबलम्

राशेर्तृतीयो भागः द्रेष्काण इत्युच्यते ।मेषादिद्वादशराशीनां प्रथमखण्डानां शून्यतः दशांशपर्यन्तं (००-१०) भौमादिग्रहाः, द्वितीयखण्डे एकादशांशतः विंशत्यंशपर्यन्तं (११-२०) सूर्यादयो ग्रहास्तथा च तृतीयखण्डे एकविंशत्यंशतः त्रिंशदंशपर्यन्तं (२१-३०) शुक्रादयो ग्रहाः स्वामिनो भवन्ति।

## द्रेष्काणचक्रम्

| राशयः<br>द्रे.अधिपाः | १<br>मं. | २<br>बु. | ३<br>गु. | ४<br>शु. | ५<br>श. | ६<br>सू. | ७<br>च. | ८<br>भौ. | ९<br>बु. | १०<br>गु. | ११<br>शु. | १२<br>श. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| द्वि.द्रे. | सू. | च. | भौ. | बु. | गु. | शु. | श. | सू. | च. | भौ. | बु. | गु. |
| तृ.द्रे. | शु. | श. | सू. | च. | भौ. | बु. | गु. | शु. | श. | सू. | च. | भौ. |

उदा. सूर्यः ०/२४/३७ मेषस्य तृतीयद्रेष्काणेऽस्ति । तृतीयद्रेष्काणाधिपः शुक्रोऽस्ति, शुक्रः सूर्यस्य समस्थानेऽस्ति । अतः सूर्यस्य द्रेष्काणबलम् ५/०० अस्ति । चन्द्रः १०/२९/३० कुम्भस्य तृतीयद्रेष्काणेऽस्ति । तृतीयद्रेष्काणाधिपः चन्द्रोऽस्ति । चन्द्रस्य द्रेष्काणबलम् १०/०० अस्ति । भौमः ३/२२/०१ कर्कस्य तृतीयद्रेष्काणेऽस्ति । तृतीयद्रेष्काणाधिपः चन्द्रोऽस्ति, चन्द्रः भौमस्य समस्थानेऽस्ति । अतः भौमस्य द्रेष्काणबलम् ५/०० अस्ति । बुधः ००/८/५४ मेषस्य प्रथमद्रेष्काणेऽस्ति । प्रथमद्रेष्काणाधिपः भौमोऽस्ति, भौमः बुधस्य शत्रुस्थानेऽस्ति, अतः बुधस्य द्रेष्काणबलम् २/३० अस्ति । गुरुः ११/०१/२४ मीनस्यप्रथमद्रेष्काणेऽस्ति । प्रथमद्रेष्काणाधिपः शनिरस्ति, शनिः गुरोः शत्रुस्थानेऽस्ति, अतः बृहस्पतेः द्रेष्काणबलम् २/३० अस्ति । शुक्रस्य १/२३/०८ वृषस्य तृतीयद्रेष्काणेऽस्ति । तृतीयद्रेष्काणाधिपः शनिरस्ति । शनिः शुक्रस्य मित्रस्थानेऽस्ति । अतः शुक्रस्य द्रेष्काणबलम् ७/३० अस्ति । शनिः ५/४/१२ कन्याया प्रथमद्रेष्काणेऽस्ति । प्रथमद्रेष्काणाधिपः सूर्योऽस्ति । सूर्यः शनेः समस्थानेऽस्ति, अतः शनेः द्रेष्काणबलम् ५/०० अस्ति ।

### ४.१२.१.५ नवांशबलम्

राशेर्नवमो भागः नवांशः इति । नवांशस्यास्य गणना वर्षकुण्डल्यां जन्मकालिकनवमांशानुसारमेव भवति ।

उदा. सूर्यः वृश्चिकराशौ भौमक्षेत्रान्तर्गतोऽस्ति, अतः सूर्यस्य नवांशबलम् १/१५ अस्ति । चन्द्रः मीनराशौ गुरुक्षेत्रान्तर्गतोऽस्ति, अतः चन्द्रस्य नवांशबलम् १/१५ अस्ति । भौमः मेषराशौ स्वक्षेत्रान्तर्गतोऽस्ति, अतः भौमस्य नवांशबलम् ५/०० अस्ति । बुधः मिथुनराशौस्वक्षेत्रान्तर्गतोऽस्ति, अतः बुधस्य नवांशबलम् ५/०० अस्ति । गुरुः कर्कराशौ चन्द्रक्षेत्रान्तर्गतोऽस्ति, अतः गुरोर्नवांशबलम् २/३० अस्ति । शुक्रः चन्द्रक्षेत्रान्तर्गतोऽस्ति, अतः शुक्रस्य नवांशबलम् १/१५ अस्ति । शनिः कुम्भराशौ स्वक्षेत्रान्तर्गतोऽस्ति, अतः शनैश्चरस्य नवांशबलम् ५/०० अस्ति।

## ४.१३ पञ्चवर्गीयविंशोपकबलम्

पञ्चवर्गीबलनिर्णयावासरे विचरितो ग्रहः यदि स्वसुहृद् राशावस्थितो भवति तदा पूर्णबली भवति । पञ्चवर्गीबले प्राप्तं बलं यदि पञ्चतोऽल्पं भवेत्तदा ग्रहः हीनबली, ततोऽधिकं दशांशतो न्यूनं भवेत्तदा मध्यबली, ततोऽग्रे विंशांशतो न्यूनं ग्रहस्य बलं स्यात्तदा ग्रहः पूर्णबली उच्यते । यथोक्तम्-

**स्वस्वाधिकारोक्तबलं सुहृद्भे पादोनमर्द्धं समभेऽङ्घ्रिः ।**

**एवं समानीयबलं तदैक्ये वेदोद्धृते हीनबलः शरोनः ।।**[146]

| ग्रहाः | सूर्यः | चन्द्रः | भौमः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| गृहबलम् | ७/३० | १५/० | १५/० | ७/३० | ३०/० | ०/०० | १५/० |
| उच्चबलम् | १८/२८ | १३/० | ०/४० | २/४० | १६/१६ | १३/४६ | १४/५३ |
| हद्दाबलम् | ३/४५ | ७/३० | ११/१५ | ७/३० | ११/१५ | ११/१५ | ७/३० |
| द्रे.बलम् | ५/०० | १०/० | ७/३० | २/३० | २/३० | ७/३० | ५/०० |
| नवांशबलम् | १/१५ | २/३० | ५/०० | ५/०० | २/३० | १/१५ | ५/०० |
| योगबलम् | ३५/५८ | १०/३० | ३९/२५ | २५/१० | ६०/१ | ६३/४६ | ४७/२३ |
| विंशोपकबलम् | ८/५९ | १०/३० | ९/५६ | ६/१७ | १५/०० | १५/५६ | ११/५० |

146 ताजिकनीलकण्ठी अ-१, श्लो.-४०

## ४.१४ होराशास्त्रे ग्रहाणां षड्विधबलम्

जन्मपत्रस्थाः सूर्यादयो नवग्रहाः जातकस्य जननकाले तस्य जीवनं स्वीयबलैः प्रभावयन्ति । जातकस्य यथार्थशुभाशुभफलज्ञानार्थं ग्रहाणां बलाबलत्वंनितरामावश्यकमस्ति। यतो हि ग्रहाः स्वबलाबलानुसारं शुभाशुभं फलं प्रकटयन्ति। जन्मकुण्डल्यां ग्रहः यावन्मितः बलयुक्तः तादृशमेव तस्य शुभाशुभप्रभावो भवति । यथोक्तं पाराशरशास्त्रे-

**ग्रहे पूर्णबले पूर्णबलमर्द्धमर्द्धे बले फलम् ।**

**पादं हीनबले खेटे ज्ञेयमित्थं बुधैरिति ।।**[147]

अर्थात् ग्रहस्य शुभाधिपतित्वे सति शुभफलस्याधिकता विपरीतावस्थायां पापफलस्याधिक्यं भवति । एवमेवप्रकारेण यदि ग्रहः केन्द्रत्रिकोनाधिपो भूत्वाऽस्तङ्गतः नीचराशियुक्तश्च स्यात्तदाऽशुभफलदायको भवति । तद्वदेव योगकारको ग्रहोऽपि बलवान् कथितः । योगकारकेग्रहेषु स्विच्चमूलत्रिकोणादि-स्थितस्य ग्रहस्य बलत्वमुक्तं जातकशास्त्रेषु। पुनश्चापि षड्वर्गदश-वर्गषोडशवर्गादिशुद्धो ग्रहो बलवान् भवति । सारावल्यान्तु षड्वर्गशुद्धग्रहः षड्बलतुल्यो मन्यते । षड्बलैक्ययुतो बलवान्ग्रहः सर्वोपरि बलवान् भवति इति विशेषरूपेण ज्ञेयम्। अर्थात् षड्बलैक्यं बलं ग्रहस्य बलाबलविचारे सर्वोपरि बलमिति । यथा-

---

[147] बृहत्पाराशरहोराशास्त्रम्, अ.-२५, श्लो.-१४८

**अथोच्चस्वर्क्षमूलत्रिकोणस्ववर्गत्वादि ।**

**बलानि च योगस्योत्तमतामूलानीत्यूह्यम् ।।**[148]

ज्योतिषशास्त्रस्यार्वाचीनग्रन्थेषु वर्गाणां बलाबलनिर्णयः षडवर्ग, सप्तवर्ग, दशवर्ग, षोडशवर्गादिमाध्यमेन ज्ञायते । यथा-

**विलग्नहोराद्रेष्काणनवांशद्वादशांशकाः ।**

**त्रिंशांशकश्च षडवर्गः शुभकर्मसु शस्यते ।।**

**सप्तांशयुक्तः षडवर्गः सप्तवर्गोऽभिधीयते ।**

**जातकेषु च सर्वेषु वर्गाणां बलकारणम् ।।**

किन्तु अनेकेषां विदुषां मते ग्रहाणां बलानुसारेण फलदातृत्वेनास्माकमृषिभिः ग्रहाणां षड्विधबलं प्रतिपादितम् । यथा मानसागरी ग्रन्थे-

**बलावबोधेन विना दशादिक्रमावबोधो न भवेद्यतोऽतः ।**

**तत्स्थानदिक्कालनिसर्गचेष्टाद्दृगभेदभिन्नं कथयाम्यशेषम् ।।**

ज्योतिषशास्त्रस्य फलादेशविषयकमुख्यभूतानां सिद्धान्तानां ज्ञानं षड्बलसाधनानन्तरमेव भवति । जन्मकालिकग्रहाणां बलाबलविषयकज्ञानं जातकसंहितादिग्रन्थेषु सूत्ररूपेण निर्दिष्टान् स्थूलसिद्धान्तान् तर्कानुगतसूक्ष्मरूपेणोपस्थापनाय जातकपद्धतिकाराणां महनीय प्रयासो विद्यते । पद्धतिकाराः बलाबलयोगानामांशिकमानं दत्वा तद्विषयकयथार्थफलादेशनिर्णये कृतभूरि-

---

[148]उद्धृतम्- चिद्धर्षिणी टीका, सा.व., अ.-४, श्लो.-४०

परिश्रमा आसन् । पद्धतिग्रन्थेष्वन्यतम आचार्यकेशवमिश्रविरचितायाः जातकपद्धत्याः प्रशंसने दिवाकरमहाभागस्यैतादृशं कथनं प्रौढमनोरमायां प्राप्यते यत्-

**श्रीकेशवार्यवचनानि जयन्ति तानि निर्दूषणानि बहुलार्थसुपूरितानि ।**

**धन्यानि शिष्यजनबुद्धिविवृद्धिदानि स्वल्पाक्षराणि बुधतोविधायकानि।।**[149]

पद्धतिकारैः शतप्रतिशतस्थलेषु बलानयनमनुपातेन विहितम् । अनुपातस्यायं गणनविधिः बलसाधने अत्यन्तोपयुक्तः तर्कसङ्गतश्चास्ति । अत एव जातकसम्बन्धिप्रामाणिकफलादेशार्थं दैवज्ञाः प्रायः होराजातकपद्धत्यनुसारं निर्दिष्टगणनां सर्वाधिकं महत्वं ददति ।

ग्रहाणां बलसाधनं बृहत्पाराशरहोराशास्त्र-श्रीपतिपद्धति-केशवीयजातक-पद्धति-दामोदरपद्धति-मुकुन्दपद्धति-फलदीपिकादिप्रामाणिकग्रन्थे-ष्वाप्यते । तत्र किन्नाम ग्रहबलम् ? ग्रहव्युत्पत्यर्थविषये प्रोच्यते यत् 'गृह्णाति सर्वान् सांसारिक-पदार्थानेकत्र पुञ्जीकृत्य स्वस्मिन्निवेश्यतीति ग्रहः'[150]। इमे ग्रहाः आकाशे स्वस्थितिवशात् युती-दृष्टिकारनाच्च राशिभावयोः स्वबलत्वं निर्बलत्वं वा प्राप्नुवन्ति । ग्रहबलज्ञानार्थं भचक्रे ग्रहस्थितिः विविधदृष्टिभिः निरीक्ष्यते परीक्ष्यते च । परीक्ष्यमाणानीमानि शक्तेः स्रोतांस्येव ग्रहबलमितिपदेन ज्ञायते ।

ज्योतिषशास्त्रे ग्रहाणां दृष्टिमाकृतिमाधृत्य षड्विधबलं प्रतिपादितं ज्योतिर्विद्भिः । जातकशास्त्रे षड्विधवलस्य महन्महत्त्वं विद्यते । बली-निर्बलग्रहैः

---

[149]जातकपद्धतिः, प्रौढमनोरमा टीका, पृ. १०

[150]फलदीपिका अ.-४, श्लो.-१

गूढरहस्योद्घाटनमेव जातकशास्त्रमुच्यते । ग्रहस्य फलदातृत्वक्षमतासूचकत्वात् फलादेशकथने षड्बलमाधारभूतत्वरूपेण स्वीक्रियते । यथोक्तं फलदीपिकायाम्-

**वीर्यं षड्विधमाह कालजबलं चेष्टाबलं स्वोच्चजम् ।**

**दिग्वीर्यं त्वनोद्भवं दिविषदां स्थानोद्भवं च क्रमात् ।।**[151]

१ स्थानबलम्, २ दिग्बलम्, ३ कालबलम्, ४ चेष्टाबलम्, ५ नैसर्गिकबलम्, ६ दृग्बलम् । एतेषां समेषां बलानां जातकपद्धतिषु विस्तरेण वर्णनमवाप्यते । साम्प्रतमेषां विमर्शनमात्र विधीयते ।

**४.१४.१ स्थानबलम्**

जन्मकुण्डल्यां वा वर्षकुण्डल्यां ग्रहाः स्थितिवशात् युतिवशाच्च यद् बलं धारयन्ति तदेव स्थानबलमुच्यते । यथा-

**स्वोच्चस्वदृग्गाणत्रिकोणसुहृदराश्यंशवैशेषिकवर्गवन्तः ।**

**आरोहवीर्याधिकबिन्दुकास्ते खेचारिणः स्थानबलाधिकास्स्युः ।।**[152]

**स्वोच्च सुहृत्स्वद्रेक्काणे नवांशैः, स्थानबलं स्वगृहोपगतेश्च ।**

अर्थात् ग्रहः स्व-उच्चगृहे, मित्रगृहे, स्व-द्रेष्काणे, नवांशे वा स्वगृहे चेत्तदा स्थानबली इत्युच्यते । स्थानबलेन हीनस्य ग्रहस्य लक्षणविषये प्रोक्तम्-

---

[151]जातकपद्धतिः, अ.-२, श्लो.-१

[152]जा.प. अ.-२, श्लो.-३३

**नीचारिपापखगयोगनिरीक्ष्यमाणास्तद्वर्गसंधिलघुबिन्दुरंशकाश्च।**

**आदित्यरश्मिपरिभूतपराजितास्ते दृष्ट्यादिशक्त्यसहिताश्च न शोभना स्युः ।।**[153]

स्थानबलस्योच्चबलं-सप्तवर्गजबलं-युग्मायुग्माभांशबलं-नवांशबलं-द्रेष्काणबलमिति पञ्चभेदाः भवन्ति ।

### ४.१४.१.१ उच्चबलम्

**स्वोच्चस्थितः शुभफलं प्रकरोति पूर्णम् ।**

**नीचर्क्षस्तु विफलं रिपुमन्दिरेऽल्पम् ।।**[154]

इत्यनुसारं स्वोच्चराशौ स्थितः ग्रहः पूर्णरूपेण शुभफलं प्रददाति, परं नीचराशिगतग्रहो विफलो भवति तथा च शत्रु गृहेऽप्यल्पफलदो भवति । अत्राचार्य-केशवस्य कथनमिदं युक्तियुक्तं प्रतिभाति । तथा च बृहत्पाराशरहोराशास्त्रेऽपि-

**नीचोनं तु ग्रहं भार्धाधिकं चक्राद्विशोधयेत् ।**

**भागीकृत्य त्रिभिर्भक्तं फलमुच्चबलं भवेदिति ।।**[155]

इत्थं महर्षिपाराशरेण ग्रहनीचान्तरे त्रिसंख्यया तथा च नीलकण्ठ[156]दैवज्ञे-नात्र नवसंख्यया ग्रहस्योच्चबलं साधितम् ।

### ४.१४.१.२ सप्तवर्गजबलम्

---

[153]जा.प. अ.-२, श्लो.-३४

[154]सा.व. अ.-५, श्लो.-२५

[155]बृहत्पाराशरहोराशास्त्रम् अ.-२८

[156]ता.नी. पृ.-४७

सप्तवर्गजबलं मुख्यतः ग्रहबलज्ञानार्थं क्रियते । सप्तवर्गेषु गृह-होरा-द्रेष्काण-नवांश-सप्तमांश-द्वादशांश-त्रिंशांशश्चेति समायान्ति । यथा-

**विलग्नहोराद्रेष्काणनवांशद्वादशांशकाः ।**

**त्रिंशांशकश्च षडवर्गः शुभकर्मसु शस्यते ।।**

**सप्तांशयुक्तः षड्वर्गः सप्तवर्गोऽभिधीयते ।**

**जातकेषु च सर्वेषु ग्रहाणां बलकारणम् ।।**

सप्तसु वर्गेषु ग्रहाणां स्थापनानन्तरं सप्तवर्गाणां योगजं बलं सप्तवर्गजबलं भवति । पञ्चधामैत्र्यनुसारं ग्रहाः क्रमशः मूलत्रिकोणे, स्वगृहे, अधिमित्रे, मित्रराशौ, समे, शत्रुराशौ, अधिशत्रुराशौ वा क्रमापचयेन तारतम्यवशात् त्रिचरणादिबलं प्राप्नुवन्ति । यथोक्तं श्रीकेशवाचार्येण-

**स्वर्क्षेऽर्द्धं समभेष्टमस्त्रिचरणामूलत्रिकोणे बलम् ।**

**मित्रर्क्षेऽङ्घ्रिरधीष्टभे त्रय इभांशा वैरीषष्ठ्यंशको ।**

**दंताशोध्यरिभे ग्रहाधिपवशात्खेटस्य सप्तजैक्यम् ।।[157]**

**पाराशरवचनेनापि कथनमिदं पुष्टं भवति-**

**मूलत्रिकोणस्वर्क्षाधिमित्रामित्रसमारिषु ।**

**अधिषत्रुगृहे चापि स्थितानां क्रमशो बलमिति ।।**

---

[157]जा.प. अ.-३, श्लो.-५

### ४.१४.१.३ युग्मायुग्मभांशबलम्

स्थानबलान्तर्गतं तृतीयं यद् बलं तदस्ति युग्मायुग्मभांशबलम् । स्त्रीराशिषु, स्त्रीनवांशे, पुरुषराशौ, पुरुषनवांशे वा पुरुषग्रहाणां बलाधिक्यं भवति । यथोक्तं केशवदैवज्ञेन-

**शुक्रेन्दु समभांशके हि विषमेऽन्ये दद्युरङ्घ्रिं बलम् ।**[158]

युग्मायुग्मभांशबले शनिबुधयोर्नपुंसकत्वेऽपि पुरुषाकृतित्वात् पुरुषग्रहेष्व-न्तर्भावो भवति । उक्तमपि लघुजातके-

**चन्द्रसितौ स्त्रीक्षेत्रे पुरुषक्षेत्रोपगाः शेषाः बलिनः ।**[159]

### ४.१४.१.४ नवांशबलम्

महर्षिपाराशरमतानुसारेण पुरुषग्रहाः विषमस्थाः विषमनवांशीयाश्च भवे-युस्तदा पादमेकबलं तथा च समराशीयाः समनवांशीयाश्चेत्तदा शून्यबलं धारयन्ति।

### ४.१४.१.५ द्रेष्काणबलम्

समराशेः त्रिभागो द्रेष्काणः । द्रेष्काणवशादुत्पन्नं बलं द्रेष्काणबलमुच्यते । 'द्रेष्काणाः प्रथमपञ्चमनवपानाम्' इत्यनुसारेण द्रेष्काणेशाः स्वभवानाधिपतेः, स्वराषितः, पञ्चमाधिपतेः, नवमराश्याधिपतेश्च भवन्ति । सूर्यभौमगुरवः यस्यां कस्यामपि राशौ पुरुषाणां प्राधान्यत्वात् प्रथमद्रेष्काणे, स्त्रीग्रहौ चन्द्रशुक्रौ

---

[158]जा.प. अ.-३, श्लो.-५

[159]ल.जा., अ.-२, श्लो.-७

उत्तराधिकात्वात् तृतीयद्रेष्काणे, नपुंसकाख्यौ बुधशनी तयोर्मध्ये स्थितिवशान्मध्यद्रेष्काणे पादबलं ददतः ।

यथोक्तं पराशरेण-

**आदिमध्यावसानेषु द्रेष्काणेषु स्थिताः क्रमात् ।**

**पुंनपुंसक्योशाखया दद्युरङ्घ्रिमितं बलम् ।।**[160]

**एतद्भिन्नद्रेष्काणेषु ग्रहाः शून्यबलिनो भवन्ति ।**

### ४.१४.२ दिग्बलम्

'तद्वीर्यं फलं स्वदिक्षुखचरस्तादृग्विधं कारयेत्'[161] इत्युत्तरकालामृतवचनानुसारेण ग्रहाः स्व-स्वदिशायां स्वदिग्बलानुसारं फलं प्रयच्छन्ति । यो ग्रहः यस्यां दिशि बलवान् भवति तत्सम्बन्धिबलं दिग्बलमुच्यते । बलमिदं आशाबलं, दिग्बलं, दिशाबलं, हरिबलमित्यादिभिः नामभिः जातकशास्त्रैः निर्दिष्टमस्ति । यथोक्तं जातकपारिजाते-

**विलग्नपातालवधूनाभोगा बुधामरेज्यभृगुसुनूचन्द्रौ ।**

**मन्दो धरासुनू दिवाकरश्चेत् क्रमेण ते दिग्बलशालिन: स्युः ।।**[162]

---

[160]बृ.पा.हो.शा., अ.-२८, श्लो.-५

[161]उ.काल., पृ.-३०(उत्तरकालामृतम्)

[162]जा.प. अ.-२, श्लो.-१९

तथोक्तं बृहज्जातके भगवता मिहिरेण- “दिक्षु बुधाङ्गिरसौ रविभौमौसूर्यसुतः सितशीतकरौ च ।”[163]पूर्वदिशायां अर्थात् प्रथमलग्ने बुधः गुरुश्च बलयुक्तौ भवतः। मध्यदिशायां अर्थात् दशमलग्ने सूर्यभूमौ बलयुक्तौ कथितौ। पश्चिमदिशायां अर्थात् सप्तमलग्ने शनिराह्वोः बलं कथितम् तथा च अधः (उत्तरदिक्षु) अर्थात् चतुर्थलग्ने चन्द्रशुक्रयोः बलं वर्णितम् ।

### ४.१४.३ कालबलम्

कालजं समयजं वा बलं कालबलमुच्यते । काल इत्युक्ते दिवसस्य पूर्वापरभागौ रात्रिः, पक्षः, मासः, वर्षेत्यादयः कलनात्मकेन गृह्यन्ते। समयानुसारं ग्रहाः भिन्न-भिन्नकाले बलाबलत्वमधिगच्छन्ति। कालबलविषये जातकपारिजाते वर्णितम्-

**निशीन्दुमन्दावणिजाः परि हनि स्वकीयहोरासममासवासराः ।**

**सितादिपक्षद्वयगाः शुभाशुभाः बुधः सदा कालजवीर्यशालिनः ।।**[164]

सारावल्यामपि-

**जीवार्कस्फुजितोऽह्नि विच सततं मन्देन्दुभौमा निशि ।**

**होरामासदिनाब्दपाश्च बलिनः सौम्याः सितेऽन्येऽसिते ।।**

बृहज्जातकेऽपि-

**निशि शशिकुजसौराः सर्वदा ज्ञोऽह्नि चान्ये**

---

[163]बृ.जा., अ.-२, श्लो.-१९

[164]जा.प., अ.-२, श्लो.-३६

**बहुलसितगतः स्युः क्रूर सौम्याः क्रमेण ।**

**द्व्ययनदिवसहोरामासपैः कालवीर्यं ......।।**[165]

जन्मकालिकपत्र्यनुसारं शनिभौमचन्द्राः रात्रौ, गुरुशुक्रसूर्याः दिवसे, होरेशः स्वहोरायां, वर्षपतिः स्ववर्षे, मासेशः स्वमासे, वारेशः स्ववारे बली भवति । रुद्रभट्टेन कालबलविषये व्याख्यायितम्-'स्वदिवसे स्वसमायां, स्वकालहोरायां स्वमासे च । स्वदिवसः स्ववारः । संवत्सरादौ यस्य प्रथम वारो भवति स तस्य संवत्सराधिपतिः । मासस्याप्येवमेवाधिपत्यम् । कालहोरादिनद्वादशांशात्मिका प्रसिद्धैव । एभिः कालवीर्यं वक्तव्यम् । कालबलस्य नतोन्नतबल-पक्षबल-दिनरात्रिविभाग-वर्षेश-मासेश-दिनेश-होरेशबलानीति सप्तभेदाः भवन्ति ।

### ४.१४.४ चेष्टाबलम्

भौमादिपञ्चताराग्रहाणां वक्रत्वं चेष्टाबलमुच्यते । चेष्टाबलं गतिसम्बन्धेन ज्ञायते । कुजादयः पञ्चताराग्रहाः निकषे (नीचासन्ने) वक्रतामुपयान्ति । यथोक्तं वराहेण-

**उदगयने रविशीतमयूखौ वक्रसमागमाः परिशेषाः ।**

**विपुलकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्ययुताः परिकल्प्याः ।।**[166]

वक्रीग्रहाः विपुलबिम्बत्वात् परमनीचस्थाने परमरूपमिता चेष्टाबलयुताः भवन्ति । तत्र शीघ्रकेन्द्रं षड्राशितुल्यं भवति । तत्रतः सञ्चरणेन क्रमशः बिम्बह्रासेण चेष्टाबलस्यापि ह्रासो जायते । केशवीयजातकपद्धति-श्रीपतिपद्धत्यादिग्रन्थेषु

---

[165]बृ.जा. अ.-२, श्लो.-१९

[166]बृ.जा., अ.-२, श्लो.-८

ग्रहाणां वक्रत्वमेव चेष्टाबलं कथितम् । सूर्यचन्द्रयोः चेष्टाबलं न भवति यतस्तौ वक्रिणौ न भवतः । अर्थात् भौमादिपञ्चताराग्रहाणामेवेदं बलं भवति ।

### ४.१४.५ नैसर्गिकबलम्

ग्रहाणां स्वाभाविकं यद्बलं तदेव नैसर्गिकबलमुच्यते । सर्वदा स्थिररूपत्वादस्य नैसर्गिकबलमिति संज्ञा विद्यते । ग्रहाणामिदं बलं तेषामाभावशात् भवति । ग्रहेषु सूर्यो सर्वाधिको प्रकाशकः, अतः सूर्यस्य बलं सर्वाधिकं भवति । एवमेव शनैश्चरस्य कृष्णवर्णत्वात् न्यूनतमं बलं भवति । यथोक्तं वराहमिहिरेण-श-कु-बु-गु-शु-च-राद्याः वृद्धितो वीर्यवन्तः ।[167]

मन्दादङ्गारको बलवान्, अङ्गारकाद् बुधः, बुधाज्जीवः, जीवाच्छुक्रः, शुक्राच्चन्द्रः, चन्द्रादादित्यः एतद् ग्रहाणां स्वाभाविकं बलं भवति । यस्य नैसर्गिकं बलमधिकं भवति सैव बली भवति । यथोक्तं-

**कृष्णारबुधगुरुसिताः शशिसूर्यावुत्तरोत्तरं बलिनः ।**

**स्वाभाविकबलमेतद्बलसाम्ये चिन्तयेत्प्राज्ञः ।।**

### ४.१४.६ दृष्टि(दृग्)बलम्

दृग्बलमर्थात् दृष्टिबलम् । जन्माङ्गे परस्परदृष्टिवशाद् ग्रहाः यद् बलं धारयन्ति तद्दृग्बलमुच्यते । दृग्बलनयनात्पूर्वं ग्रहाणां दृष्टिसाधनमपेक्षते । ग्रहाणां दृष्टिविषये पराशरेणोक्तम्-

---

[167]बृ.जा., अ.-२, श्लो.-२१

**एकराशिवशाद् दृष्टिः पूर्वमुक्ता च या द्विज ।**

**आनया खेटस्वभावोत्था स्फुटां तां कथयाम्यहम् ।।**

**त्रिदशे च त्रिकोणे च चतुरस्रे च सप्तमे ।**

**पादवृद्ध्या प्रपश्यन्ति प्रयच्छन्ति फलं तथा ।**

**पूर्णं च सप्तमं सर्वे शनि-जीव-कुजः पुनः ।**

**विशेषतश्च त्रिदश-त्रिकोण-चतुरष्टमान् ।**

**इति सामान्यतः पूर्वैराचार्यैः प्रतिपादिताः ।**

**स्फुटानतरवशाद्या च दृष्टिः साऽतिस्फुटा यथा ।।**[168]

मुख्यतः दृष्टिः द्विविधा- सामान्यदृष्टिः, स्पष्टदृष्टिश्च । सामान्यदृष्टिरपि राशिग्रहभेदेन द्विविधात्मिका । ग्रहाणां स्वाभाविकसामान्यदृष्टिविषये कथितमस्ति यत् सर्वे ग्रहाः तृतीयं दशमं च स्थानं एकपाददृष्ट्या, नवमं पञ्चमं च स्थानं द्विपाददृष्ट्या एवं च चतुर्थाष्टमं स्थानं त्रिपाददृष्ट्या पश्यन्ति । एतद् भिन्नं सर्वे ग्रहाः सप्तमं स्थानं पूर्णदृष्ट्या पश्यन्ति । यथोक्तं बृहज्जातके-

**त्रिदशत्रिकोणचतुरस्रसप्तमान्यवलोकयन्ति चरणाभिवृद्धितः ।**

**रविजामरेज्यरुधिराः वरे च ये क्रमशो भवन्ति किल वीक्षणेऽधिकाः ।।**[169]

---

[168]बृ.पा.हो.शा., अ.-२७

[169]बृ.जा., अ.-२, श्लो.-१३

दर्शको ग्रहो द्रष्टा तथा यं पश्यति सो दृश्यः, यस्य ग्रहस्य दृष्टिबलं ज्ञातव्यं स द्रष्टा, यस्योपरि दृष्टिबलं ज्ञातव्यं सो दृश्यः । दृश्ये ग्रहे द्रष्टारं न्यूनीकृत्य राश्यादिरूपेण लेखनीयम् । ये शेषांशाः ते गतैशान्तरेण गुणनीयाः । पुनः त्रिंशत्संख्यया विभज्य (शेषांश x गतैष्यान्तर/३०) यथोक्तं मानसागर्यां-

**खैकाग्निद्विखवेदरामयमभूखाभ्रमेकादिभे द्रष्टा**

**वर्ज्जितदृश्यकस्य गुरुणा चेदष्टवेदे कृताः ।**

**मन्देनाङ्कयमेसृजा नगगुणेऽङ्काः भादिजाः संस्कृता**

**मागघ्नक्षयवृद्धिखानललवेनाब्ध्युद्धृता दृग् भवेत् ।।**[170]

एवं यस्य ग्रहस्य बलयोगः (षड्बलैक्यम्) त्र्यंशान्यूनं सो निर्बलः, यस्य षडंशादधिकं सः पूर्णबली, यस्य त्र्यंशादधिकं षडंशाच्च न्यूनं स मध्यबली कथ्यते ।

इत्थं ज्योतिषशास्त्रे षड्बलस्यान्यतमं स्थानं विद्यते । फलादेशस्य मुख्यभूताः सिद्धान्ताः आयुर्दायपद्धति-दशापद्धति-इष्ट-फलभावफलादीनां निर्णयः ग्रहबलं विना साधयितुं न शक्यते । अतः ग्रहबलस्य नितरामुपयोगित्वं सिद्ध्यति । षड्बलैक्ययुतो ग्रहः सर्वाधिको बलवान् भवति । यद्यपि जातकशास्त्रेषु स्पष्टतया अस्य निर्देशो न प्राप्यते, तथापि स्वयं सिद्धमिदं यत् ग्रहबालत्वे सति योगः विशेषफलप्रदाः भवन्ति । पराशरेणाप्युक्तम्- 'निर्बलो नैव योगकृत्' । इत्थं ग्रहबलं

[170]मानसागरी, अ.-४, श्लो.-१९

सम्यग् अन्विष्य फलादेशः क्रियते चेत्तदा फलादेशस्य सयुक्तिकं तात्त्विकं च विवेचनं दैवज्ञैः कर्तुं शक्यते ।

विशेषः – "स्वत्रिकोणे" एवं च "स्वदृक्काणे" होराविवृत्ति संस्करणे "द्रेष्काण"स्थितग्रहं स्थानबली कथितम् । भट्टोत्पलेत्यादन्यटीकासंस्करणेषु "त्रिकोण" अर्थात् पञ्चम-नवमस्थानस्थितग्रहाः स्थानबली इत्युच्यन्ते । अन्यत्र तु द्वाभ्यामेव मतं समानम् ।

## ४.१५ ग्रहाणांविंशोपकबलम्

जन्मकुण्डल्यां ग्रहाणां वास्तविकस्थितिं ज्ञातुं भावस्पष्टीकरणं विधीयते । भावस्पष्टानन्तरमेव चलितकुण्डल्यादीनां निर्माणं भवति, येन ग्रहाणां सूक्ष्मस्थित्यनुसारेण भावमधिकृत्य शुभाशुभफलस्य, विशिष्टयोगस्य सूक्ष्मफलस्य च ज्ञानं सुगमतया भवति ।

यथोक्तं मानसागर्याम्-

**जन्मप्रयाणे व्रतबन्धचौलनृपाभिषेकाकरसग्रहेषु ।**

**एवं हि भावाः परिकल्पनीयास्तैरेव योगोत्थफलानि यस्मात् ।।**[171]

भावसाधनपद्धत्या साधितं लग्नादिद्वादशभावानां स्पष्टराश्यादिमानं भावमध्यबिन्दु इति मन्यते । भावमध्यबिन्दुतः प्रारम्भबिन्दुः अवसानबिन्दुश्च मध्यमानेन स्पष्टमानेव वा पञ्चदशांशैः न्यूनाधिकाः भवन्ति । प्रत्येकस्य भावस्यांशकलादिस्पष्टातिरिक्तं भावद्वयमध्ये अंशादिमानतुल्यं सन्धिः मन्यते ।

[171] मानसागरी पृ.-१४६

सन्धिरियं प्रत्येकागामीभावापेक्षया आरम्भसन्धिः गतभावापेक्षया विरामसन्धिः स्वीक्रियते। यथोक्तं बृहत् पाराशरहोराशास्त्रे-

**लग्नात्-तिथ्यंशतः पूर्वं भावारम्भः प्रजायते।**

**तिथ्यंशैः परतस्तस्य पूर्तिः सन्धी च तौ स्मृतौ ।।**

सन्धिगतो ग्रहः निर्बलो भवति । सन्धिमानाद् अधिकमानयुक्तो ग्रहः अग्रिमभावानुसारं, सन्धिमानाद् अल्पमानयुक्तो ग्रहः गतभावानुसारं फलं करोति। तथा चोक्तम् –

**आरम्भसन्धेर्द्युचरो यदोनः फलं ददात्यादिमभावजातम्।**

**विरामसन्धेराधिकस्तदानीमागामिभावोत्थफलप्रदः स्यात् ।।**

भावे विद्यमानग्रहास्यांशादयः भावस्पष्टस्यांशादितुल्यः स्यात्तदा ग्रहः तद्भावस्य पूर्णफलं करोति । भावमानाधिके न्यूने वा ग्रहामाने सति त्रैराशिकविधिना स्पष्टभावफलमानीयते। यथोक्तम्-

**भावांशतुल्यं खलु वर्तमानो भावोद्भवं पूर्णफलं विधत्ते।**

**भावोनके चाप्यधिके च खेटे त्रैराशिकेनात्र फलं विचार्यम् ।।**

अतो सिद्ध्यति यत् भावप्रवृत्तौ फलप्रवृत्तिः ततः क्रमापचयेन भावाग्रे पूर्णता तथा क्रमापचयेन सन्धौ फलस्य न्यूनता । अतो मध्ये विंशोपकबलमानीयते । तन्नानयनप्रकारः-

**ग्रहसन्ध्यन्तरं कार्यं विंशत्या गुणितो भजेत्।**

**भावसन्ध्यन्तरेणाप्तं फलं विंशोपकं स्मृतम् ।।**

अत्रानुपातः-

यदि भावतुल्येत्ग्रहे भावसन्ध्यन्तरतुल्यग्रहान्तरेण पूर्णफलं (विंशतिसमं) लभ्यते तदेष्टसन्धिग्रहान्तरेण किमिति....?

ग्रह –सन्धि x २० = विंशोपकबलम् ।

### ४.१५.१ ग्रहाणामंशकबलम्

विंशोपके प्रत्येकग्रहेभ्यः विंशत्यङ्केषु पूर्वनिर्धारिताः अङ्काः प्रदत्ताः । राशिवर्गाय ६ अङ्काः, नवांशाय ५ अङ्काः, द्रेष्कोणाय ४ अङ्काः, होरा तथा द्वादशांशाय द्विरङ्काः प्रदत्ताः सन्ति ।

सूर्यस्य विंशोपकबलम्

पञ्चमभावस्पष्टः – १२/१७/२७/५३

सन्धिः – १२/१९/४३/०२

सूर्यस्पष्टः – १२/२४/३७/४२

| | |
|---|---|
| १२/२९/४३/०२ | १२/२९/४३/०२ |
| १२/२४/३७/०२ | - १२/१७/२७/५३ |
| ००/०५/०५/२० | ००/१२/१५/०९ |
| X २० | = ४४१०९ सजातीयः |
| ३६६४०० | |

३६६४००                = ८.३० सूर्यस्य विंशोपकबलम्

४४१०९

चन्द्रस्य विंशोपकबलम्

अष्टमभावस्पष्टः – ०३/११/५८/११

सन्धिः – ०३/२९/४३/०२

चन्द्रस्पष्टः – ०३/२७/१९/२६

| | |
|---|---|
| ०३/२९/४३/०२ | ०३/२९/४३/०२ |
| ०३/२७/१९/३६ | ०३/११/५८/११ |
| ००/०२/२३/२६ | ००/१७/४४/५१ |

X        २०        = ६३८९१ सजातीयः

१७२१२०

१७२१२०        = २.६ चन्द्रस्य विंशोपकबलम्

६३८९१

भौमस्य विंशोपकबलम्

एकादशभावस्पष्टः – ०६/१७/२७/५३

सन्धिः – ०६/२९/४३/०२

भौमस्पष्टः – ०६/२८/०९/३७

०६/२९/४३/०२ ०६/२९/४३/०२

०६/२८/०९/३७ ०६/०७/२७/५३

००/०१/३३/२५ ००/२२/१५/०९

X २० = ८७१०९

११२१००

११२१००

८७१०९ = १.३९ भौमस्य विंशोपकबलम्

बुधस्य विंशोपकबलम्

पञ्चमभावस्पष्टः – १२/१७/२७/५३

सन्धिः – १२/०५/१२/४५

बुधस्पष्टः – १२/०३/०२/५१

१२/०५/१२/४५ १२/१७/२७/५३

१२/०३/०२/५१ १२/०५/१२/४५

००/०२/०९/५४ ००/१२/१५/०८

X २० = ४४१०९

५५८८०

१५५८८०

४४१०९ = ३.५३ बुधस्य विंशोपकबलम्

गुरोर्विंशोपकबलम्

लग्नस्पष्टः – ०८/०६/२८/२८

सन्धिः - ०९/२४/१३/२०

बुधस्पष्टः - ०८/०९/१२/१२

| | |
|---|---|
| ०९/२४/१३/२० | ०९/२४/१३/२० |
| ०८/१९/१२/१२ | ०८/०६/२८/२८ |
| ०१/०५/०१/०८ | ०१/१७/४४/२८ |

X २० = १७१९७२

२५२१३६०

१७१९७२ = १४.६ गुरोः विंशोपकबलम्

शुक्रस्य विंशोपकबलम्

पञ्चमभावस्पष्टः – १२/१७/२७/५३

सन्धिः – १२/०५/१२/४५

शुक्रस्पष्टः - १२/१४/२१/१४

| | |
|---|---|
| १२/१४/२१/१४ | १२/१७/२७/५३ |
| १२/०५/१२/४५ | १२/०५/१२/४५ |

००/०९/०८/२९ ००/१२/१५/०८

X २० = ४४१०८

६५८१८०

६५८१८०

४४१०८ = १४.९२ शुक्रस्य विंशोपकबलम्

शनेः विंशोपकबलम्

एकादशभावस्पष्टः – ०६/१७/२७/५३

सन्धिः - ०६/२९/४३/०२

शनिस्पष्टः - ०६/१९/०२/४२

०६/२९/४३/०२ ०६/२९/४३/०२

०६/१९/०२/४२ ०६/१७/२७/५३

००/१०/४०/२० ००/१२/१५/०९

X २० = ४४१०९

७६८४००

७६८४००

४४१०९ = १७.४२ शनेः विंशोपकबलम्।

त्रैराशिकविधिं समधिकं स्पष्टीकुर्वन्नाचार्यभास्करेण सिद्धान्तशिरोमणौ कथितम् -

**प्रमाणमिच्छा च समानजाती आद्यन्तयोः स्तः फलमन्यजातिः ।**

**मध्ये तदिच्छाहतमाद्यहृत्स्यात् इच्छाफलं व्यस्तविधिर्विलोमे ।।**[172]

अर्थात् प्रमाणमिच्छे च सजातीयौ फलस्यान्यजातिर्भवति । अस्य स्थापना अनेन प्रकारेण कर्त्तव्या-

प्रमाणः अन्यः इच्छा इष्टमानम्

अन्यफलमिच्छां च परस्परं गुणीकृत्य प्रमाणेन भक्त्वा लब्धिः इष्टमानमर्थात् फलं भवति । उदाहरणेनात्र स्पष्टीक्रियते –

अष्टमितिः पलैर्यदि ६० कलाः लभ्यन्ते तदेष्टकलायां किमिति ?

पूर्वोक्तप्रकारेण स्थापनेन .......

| प्रमाणम् | अन्यफलम् | इच्छा | इच्छामानम् |
|---|---|---|---|
| ८ | ६० | ५ | .....?...... |

अन्यफलम् इच्छा ६० x ५ = ३०० / प्रमाणम् -८

३०० = ३७ कलाः ।

[172]सिद्धान्तशिरोमणिः, का.मा. टीका, श्लो.-२०

शेषफलं चतुर्संख्यां षष्ट्या गुणीकृत्य पुनः प्रमाणेन भागीकृत्य विकलात्मकं फलं लभ्यते –

$$\frac{४ \times ६०}{८} = \frac{२४०}{८} = ३० \text{ विकलः}$$

पद्धतिकारैरपि अनयैव त्रैराशिकपद्धत्यनुसारं स्पष्टग्रहस्य स्पष्टभावस्य च राश्यंशकलान्तरानुपातेन कालात्मकं भावफलमानीतम् । कलात्मकं भावफलमिदं सूचयति यदमुकराश्यंशकलास्थस्य ग्रहास्याभीष्टभावे कियन्मितं फलं भविष्यति । विश्वलग्नसारण्यामाचार्यप्रियव्रतशर्मणा भावफलमात्रा – सारणीमाध्यमेन भावफलमानीतम् । येन भावेऽवस्थितस्य ग्रहस्य भावफलं सारल्येनावगन्तुं पार्यते । यस्मिन् भावेऽवस्थितग्रहस्य फलमात्राज्ञानमपेक्षितं सः इष्टभावः, यस्य च ग्रहस्य फलमात्राज्ञानमपेक्षितं स इष्टग्रहः इत्युच्यते । इष्टग्रहः इष्टभावसन्धितः अग्रे पृष्ठे वा यावदन्तरितो भवति स: इष्टसन्धिः कथ्यते । सारण्यां इष्टभावस्य स्पष्टराश्यादिकं इष्टसन्धे राश्यादिकं चान्तरं भावर्द्ध तथा च इष्टगहस्येष्टभावस्य चान्तरं ग्रहभावान्तरसंज्ञात्वेन परिभाषितम् ।

### ४.१५.२ षोडशवर्गाणां विंशोपकबलम्

शुभाशुभफलज्ञानार्थं यथा लग्नादिद्वादशभावानां ग्रहाणां च राश्यादिस्पष्टानुसारमानीतं विंशोपकबलमतीवोपयोगी विद्यते । तथैव षोडशवर्गाणामपि विंशोपकबलमप्यन्तं महत्त्वपूर्णमस्ति । सर्वे ग्रहाः स्वोच्चस्थाः पूर्णबलं धारयन्ति, स्वोच्चात् सप्तमे नीचराशौ शून्यबलं प्रयच्छन्ति । मध्ये चानुपातेन पूर्णपूर्णात्मकं बलं ग्राह्यते । तथोक्तम्-

**अथातः सम्प्रवक्ष्यामि वर्गविंशोपकं बलम् ।**

**यस्य विज्ञानमात्रेण विपाकं दृष्टिगोचरम् ।।**

**गृहं विंशोपकं वीक्ष्य सूर्यादीनां खचारिणाम् ।**

**स्वगृहोच्चे बलं पूर्णं शून्यं तत्सप्तमे स्थितम् ।।**

होरादिवर्गमध्ये ग्रहस्य पूर्णं फलं भवति अन्ते च शून्यं भवति । मध्ये तु सर्वत्रानुपातेन भवति । गुरुसूर्यभौमाः सूर्यस्य होराफलं शनिशुक्रचन्द्राश्च चन्द्रस्य होराफलं प्रयच्छन्ति । बुधस्तूभयोरेव होराफलं ददाति । समराशिषु चन्द्रस्य विषंराशिषु च सूर्यस्य होराफलं विशेषेण भवति ।

यथोक्तं पाराशरे-

**सूर्यहोराफलं दद्युर्जीवार्कवसुधात्मजाः ।**

**चन्द्रास्फुर्जिदर्कपुत्राश्च-न्द्रहोराफलप्रदाः ।।**

**फलद्वयं बुधो दद्यात् समे चन्द्रं तदन्यके ।**

**रवेः फलं स्वहोरादौ फलहीनं विरामके ।।**

त्रिंशांशे सूर्यो भौमस्य चन्द्रः शुक्रस्य सदृशं फलं धारयतः । अत्रापि गृहवदेव फलं भवति ।

### ४.१५.३ षड्वर्गाणां विंशोपकम्

लग्नहोराद्रेष्काणनवांशद्वादशांशत्रिंशांशानां षड्वर्गाणां क्रमात् ६ २ ४ ५ २ १ संख्याकाः विश्वकाः भवन्ति । एतेषां बलं यात्राविवाहादिमुहूर्तेषु चिन्तनीयाः ।

| वर्गः | राशिः | होरा | द्रेष्काणः | नवांश: | द्वादशांशः | त्रिंशांशः |
|---|---|---|---|---|---|---|
| स्वविश्वः | ८० | २० | ४० | ५० | २० | १० |

### ४.१५.४ सप्तवर्गाणां विंशोपकम्

लग्नहोराद्रेष्काणसप्तांशनवांशद्वादशांशत्रिंशांशानां सप्तकवर्गाणां विश्वबला-नयने सति क्रमेण पञ्च-द्वि-त्रि-एक-सार्द्धद्वय-सार्द्धचतु-र्द्विसंख्याकाः विश्वकाः भवन्ति।

| वर्गः | राशिः | होरा | द्रेष्काणः | सप्तांशः | नवांश: | द्वादशांशः | त्रिंशांश: |
|---|---|---|---|---|---|---|---|
| स्वविश्वः | ६.० | २.० | ४.० | ५.० | २.० | २.० | १.० |

### ४.१५.५ दशवर्गाणां विंशोपकम्

लग्नहोराद्रेष्काणसप्तांशनवांशदशांशद्वादशांशषोडशांशत्रिंशांशषष्ट्यंशानां दशवर्गाणां विंशोपाकः क्रमेण लग्नस्य ३ षष्ट्यंशस्य ५ शेषानां च सर्वेषां १.५ इति प्रत्येकस्य भवति। एते पारिजातांशादितः फलचिन्तने चिन्तनीयाः।

| वर्गः | राशिः | होरा | द्रेष्का. | सप्तां. | नवां. | दशां | द्वादशां. | षोड. | त्रिंशां. | षष्ट. |
|---|---|---|---|---|---|---|---|---|---|---|
| स्ववि. | ३.० | १.५ | १.५ | १.५ | १.५ | १.५ | १.५ | १.५. | १.५ | ५.० |

### ४.१५.६ षोडशवर्गाणां विंशोपकम्

लग्नहोराद्रेष्काणचतुर्थांशसप्तांशनवांशदशांशद्वादशांशषोडशांशविंशांशचतु र्विंशांशसप्तविंशांशत्रिंशांशखवेदांशक्षवेदांशषष्ट्यंशाश्च षोडशवर्गाः भवन्ति। इमे जातकेषु सूक्ष्मफलचिन्तने चिन्तनीयाः। तत्र होराद्रेष्काणत्रिंशांशानां प्रत्येकस्य १ षोडशांशस्य २ नवांशस्य ३ लग्नस्य ३.५ षष्ट्यंशस्य ४ शेषाणां वर्गाणां प्रत्येकस्य ०.५० इति विश्वकाः भवन्ति। एवं विंशसंख्यात्मकयोगे सर्वयोगे च बलं भवति।

एवं च स्ववर्गस्य २० अधिमित्रस्थस्य १८ मित्रस्थस्य १५ समस्थस्य १० शत्रुस्थस्य ७ अधिशत्रुस्थस्य च ५ विश्वकबलं भवति ।

### ४.१६ ग्रहबलस्यग्रहाणां चमानवजीवने प्रभावः

होराशास्त्रदृष्ट्या मानवजीवने ग्रहरश्मिप्रभावो दृश्यते खलु । गर्भाधानात्मृत्युपर्यन्तं जातकस्य सुखदुःखोन्नत्यवनतिविद्याविद्यारोगारोग्य-शुभाशुभादीनां परिस्थितिनामादेशो ग्रहाणां शुभाशुभबलाबलनीचोच्च-मित्रामित्रादीनामाधारेण दैवज्ञैः कृतः । ग्रहाराशिनक्षत्रादीनां शुभाशुभं यत्फलं जन्मकुण्डलीप्रश्नकुण्डलीमाध्यमेन च प्रकटीक्रियते, तत्सत्यमिति वैज्ञानिकाः स्वीकुर्वन्ति। अस्माकमृषिभिःयोगबलमाध्यमेन'यत्पिण्डे तत्ब्रह्माण्डे' इति तत्त्वं विज्ञाय शरीरस्थसौरमण्डले एव ग्रहनक्षत्रादीनां पिण्डानां रहस्यं विज्ञातम्। ग्रहनक्षत्राणि ब्रह्माण्डीयैः पदार्थैः निर्मितास्सन्ति, तथैव मानवानपि निर्मितिर्भवति। ब्रह्माण्डानि पिण्डानि च समष्टिव्यष्टिभेदतः परस्परं मिलितानि सन्ति । यथोक्तम्-

**ब्रह्माण्डानि पिण्डानि च समष्टिव्यष्टिभेदतः।**

**परस्परविमिश्राणि सन्त्यनन्तानि संख्यया ।।**[173]

ब्रह्माण्डस्य सर्वेऽपि पदार्थाः परस्परं प्रभाविताः भवन्ति, अतो सुनिश्चितमिदं यदसौ जीवः ग्रहबलेनाभिभूयते। द्वादशराशिषु भ्रमणकर्तृषु सूर्यादिग्रहेषु आत्मा सूर्यः, मनश्चन्द्रः, सत्त्वं भौमः, बुधो वाणी, गुरुसुखज्ञानपरः, शुक्रो मदनःशनिश्च दुःखमस्ति। यथोक्तम्-

[173]सूर्या., पृ. ५४

**कालात्मादिनकृन्मनस्तु दिनगुः सत्त्वं कुजो ज्ञो वचो ।**

**जीवो ज्ञानसूखे सितश्च मदनं दुःखं दिनेशात्मजः।।**[174]

जन्मकाले को ग्रहः बली कश्च निर्बलश्चेत्यस्य ज्ञानं कृत्वा तदाधारेणैव मानवस्य रूपवर्णाकृतिगुणदोषव्यक्तित्वादीनां ज्ञानं भवति । सौरजगति स्थितानां ग्रहनक्षत्राणां पिण्डैः सहास्माकं सततसम्बन्धोऽस्ति । तेन च सम्बन्धेन ग्रहनक्षत्राणां गति-स्थिति-रासायनिकर्तुपरिवर्तनानुरूपमस्माकं जीवनमपि प्राभावितं भवति । अस्मिन् प्रसङ्गे जलवायोः परिवर्तनेन सौरपरिवारस्य ग्रहाः अस्माकं दूरे निकटे वा तिष्ठन्ति तेन कारणेन ग्रहाणां स्थित्या गत्या चोपपद्यन्ते, अत एव जलवायोः परिवर्तनेन यो हि प्रभावो माजवजीवने पतति स ग्रहाणामेव प्रभावोऽस्तीति वक्तुं शक्यते । वस्तुतो जलवायोः परिवर्तनं सौरपरिवारस्य ग्रहाणां राशिविषये गत्याऽस्माकं दूरे निकटे वा स्थित्या भवति यथा हि ग्रीष्मर्तौ वर्षे, मिथुने वा स्थितस्य सूर्यस्य किरणेषु प्रचण्डता तथा हेमन्तर्तौ वृश्चिके, धनुषि वा स्थितस्य सूर्यस्य किरणेषु मृदुता भूमिसूर्ययोर्दूरत्वासन्नत्वभावेन भवति । तात्पर्योऽयमस्ति यद् ग्रीष्मर्तौ सूर्योस्माकं निकटे भवति हेमन्तर्तौ च स दूरे तिष्ठति । यदा सोऽस्माकं निकटे भवति तदा तस्य किरणेषु प्रचण्डता भवति, यदा च दूरे भवति तदा स्वाभाविकरूपेण तस्य किरणेषु मृदुताऽनुभूयते । शुभाशुभफलविपाकविवेचनार्थं राशीनां स्वामिनः (ग्रहाः) नवमांशकाः तेषामधिपतयश्च निर्दिश्यन्ते । तद्यथा-

[174]बृहज्जातकम्, अ.-२, श्लो.-१

**क्षितिजसितज्ञ चन्द्ररवि-सौम्यसितावनिजाः ।**

**सुरगुरुमन्दसौरिगुरवश्च गृहांशकाः ।**

**अजमृगतौलि चन्द्रभवनादि नवांशविधि-**

**र्भवनसमांशकाधिपतयः स्वगृहात् क्रमशः ।।**

भट्टो.- 'क्षितिजादयो ग्रहाः मेषादिराशीनां स्वामिनो भवन्ति । यथा- अङ्गारकः मेष-वृश्चिकाधिपतिः, सितः वृषभ-तुलयोः, बुधः मिथुन-कन्ययोः, चन्द्रः कर्कटस्य, रविः सिंहस्य, शनैश्चरः मकर-कुम्भयोरधिपतिः वर्तते । एते एव नवांशकाधिपतयः न केवलं मेषस्य भौमोऽधिपतिः, यावद् अस्मिन् राशौ मेषनवांशक-उदयो भवति तस्यापि भौमोऽधिपतिः । शेषाणामप्येवमेव । ते च नवांशकाः कथं भवन्तीत्याह- "अजमृगतौलिचन्द्रभवनादि नवांशविधिरिति । अर्थात् अजादि, मृगादि, तौल्यादि नवांशविधिः सर्वराशीनां भवति । तेन मेष-वृष-मिथुन-कर्कट-सिंह-कन्या-तुला-वृश्चिक-धनुर्धराणां सम्बन्धिनो नवांशा मेषस्य भवन्ति । तद्वदेव वृषस्य मकर-कुम्भेत्यादयः नवांशाः, अन्येषामपि तथैव ज्ञातव्याः । यथा-

**मेषकेसरीधन्वीनां मेषाद्या अंशकाः स्मृताः ।**

**वृषकन्यामृगाणां च मकराद्या नव स्मृताः ।**

**तुलामिथुनकुम्भानां तुलाद्या नव कीर्तिताः ।**

**कर्कटालिझषाणां च कर्कटादया नवांशकाः ।।**

अत्र विशेषः- अजमृगतौलिचन्द्रभवनादिनवांशविधिरीति शास्त्रोक्त वचनम्, अत्रेदमुक्तं भवति यत् भारतीयैः दैवज्ञैः सप्तविंशतिनक्षत्राणि कल्पितानि, तत्र चतुष्पादत्वं सर्वेषां नक्षत्राणां परिकल्पने (१०८) अष्टोत्तरशतं नक्षत्रपादाः भवन्ति, तेन १०८ इत्यस्य द्वादशभिः अपवर्तनेन नव लब्धयः भवन्ति, तेन एकस्मिन् राशौ नव नवांशाः सम्पद्यन्ते । ततो मेषराशेरन्तिमो नवांषः धनुराशीः, अतः वृषराशेः आरम्भिको नवांशः मकरराशेः, एवं मकरराशितः गणनया नवमः नवांशः कन्यायाः समुपलभ्यते, ततः मिथुनराशेः आरम्भिको नवांशः तुलायाः सम्पद्यते तथा अन्तिमो नवांशः मिथुनस्येव, तेन कर्कटस्यारम्भिको नवांशः कर्कट एव अन्तिमश्च मीनस्य एवं चतुर्षु राशिषु १०८ नवांशाः भुज्यन्ते । ततः एष एव क्रमः सिंह-कन्या-तुला-वृश्चिक-धनु-मकर-कुम्भ-मीनेषु च सम्पद्यते । यतोहि आश्लेषान्तं कर्कः, ज्योष्ठान्तं वृश्चिकः, रेवत्यन्तं मीनः इति नक्षत्रान्तराशिसन्धयः गण्डान्तपदं व्यपदेश्या भवन्ति । उपर्युक्तनवांशाः नवांशाधिपतयश्च स्वगृहे, स्वोच्चे, स्वमित्रगृहे, स्वनवांशे च भवन्ति तदा मानवजीवने शुभफलं भवति, अशुभे चाशुभं फलं लभ्यते । नवांशस्थानं जन्माङ्गानुसारेण भाग्यस्थानं वर्तते, कथितमस्ति- “भाग्ये दृढे सर्वसुखं करस्थं भाग्ये विनष्टे सकलं विनष्टम् ।”

## ४.१७ होराशास्त्रे भावबलप्रयोजनं भावफलञ्च

ज्योतिषशास्त्रस्य होरास्कन्धे शुभाशुभफलादेशविषये अनेके सिद्धान्ताः वर्णितास्सन्ति । तेषु जातकसम्बन्धिफलकथने भावबलविषयकसिद्धान्तानां

ज्ञानमावश्यकमस्ति। ग्रहाणां बलाबलज्ञानादेव लग्नादिद्वादशभावानां शरीरादीनां शुभाशुभफलं ज्ञायते। देहादयो भावाः स्वबलानुसारं फलं ददति। भावानां सबलत्वे तत्तद्भावसम्बन्धितविषयाणां प्राचूर्यं भवति । भावः अर्थात् भावयति प्रकाशयति पदार्थानिति भावः । भू धातोः घञ् प्रत्यये कृते सति भावशब्दस्य निष्पत्तिर्भवति । भावस्य शक्तिबलेन अखिलविश्वस्य सर्वाणि वस्तूनि प्रकाशितानि भवन्ति । भावबलज्ञानेन कोऽपि पदार्थः रहस्यमयो नैव भवितुमर्हति । मानवजीवनस्य प्रमुखतात्त्विकविषयाः द्वादशभावेषूपनिबद्धाः सन्ति । भावस्यैवापरनाम आश्रयस्थानमिति,भावस्यास्य स्थिररूपेण गणना भवति। यस्मिन् कस्मिन्नपि लग्ने जातकस्य जन्मो भवति तदेव प्रथमभावनाम्ना ज्ञायते, एवं कान्तिवृत्तस्य यः भागः जातकस्य जननकाले पूर्वक्षितिजे स्पृशति तस्य भागस्य जातकस्य जीवनऽत्यधिकं महत्त्वमवतिष्ठते। भावनिर्द्धारणे कृन्तिवृत्तस्य द्वादशभागात्मकस्य सर्वाधिकं महत्त्वं भवति । तन्निर्द्धारणत्वादेव भावस्याङ्कनं भवति । भारतीयवैदिकज्योतिषशास्त्रे तनु-धन-भ्रातृ-मातृ-पुत्र-शास्त्री-कलत्र-आयु-भाग्य-कर्म-आय-व्ययादीनां चर्चा अवाप्यते । एतैः द्वादशभावैरेव मानवजीवने घटितसमस्तघटनानां शुभाशुभविचारो विधीयते। भावस्य शक्तिः समृद्धिर्वा भावबलमुच्यते। कस्यापि भावस्य बलाबलनिर्णयः भाव-भावेश-भावकारकस्थितिवशाद् भवति । भावः, भावाधिपतिः भावकारकश्च त्रयो बलिनः स्युस्तदा तद्भावसम्बन्धितपूर्णफलम्, द्वयोर्बलित्वेऽर्द्धफलम्, बलिन्येके सति भावोऽल्पबली भवति ।भावबलं त्रिविधम्-भावाधिपतिबलम्, भावदिग्बलम्, भावदृग्बलञ्चेति । ग्रहाणां षड्बलसाधनवदेव प्रकारत्रयेन भावबलं निर्णीयते।

**४.१८ होराशास्त्रे भावाधिपतिबलम्-**

तन्वादिद्वादशभावानां बलाबालत्वं तद्राश्यधिपानुसारेण क्रियते । ज्योतिषशास्त्रानुसारं भौम-शुक्र-बुध-चन्द्र-सूर्य-बुध-शुक्र-भौम-गुरु-शनि--गुरवः द्वादशराश्याधिपाः भवन्ति । एतेषां द्वादशराशीनां कुण्डल्या द्वादशभावेषु स्थापनं क्रियते । क्षितिजवृत्तस्यपूर्वभागे यस्य राशेरुदयो भवति तल्लग्नमित्युच्यते । तद्राशिं प्रथमभावे संस्थाप्य अग्रिमराशिक्रमे द्वादशराशयः संस्थाप्यते । अनेन प्रकारेण द्वादशभावेषु द्वादशराशिस्थापनेन तद्राश्यधिपाः एव द्वादशराश्याधिपाः भवन्ति । एतेषां द्वादशभावाधिपानां बलमेव भावाधिपतेर्बलं भवति । यथोक्तं सारावल्याम् – **लग्नाधिपतेस्तुल्यं बलमिहचूडामणिर्वदति ।** [175]लग्नमित्युपलक्षणमस्ति । अतः भावेशबलमेव भावबलमिति । षड्बलसाधनप्रसङ्गे सूर्यादिग्रहाणां साधितं षड्बलमेव भावाधिपतिबलं भवति ।

**भावाधिपतिबलचक्रम्**

| **ग्रहाः** | **भावाधिपतिबलम्** |
|---|---|
| सूर्यः | ४०७/२८ |
| चन्द्रः | ५२४/०३ |
| भौमः | ४४०/५८ |
| बुधः | ३७३/५२ |
| गुरुः | ४३९/१२ |
| शुक्रः | ४५४/१२ |
| शनिः | ४७८/०० |

## ४.१८.१ द्वादशभावानां दिग्बलम्

[175]सा.व., अ.-५, श्लो.-२०

दिग्सम्बन्धेन भावस्य यद्बलं विचार्यते तदेव भावबलमुच्यते। भावस्येदं बलं तदभावेऽवस्थित-द्विपद-चतुष्पद-कीट-जलचरादिराशिमाध्यमेन भवति । यथोक्तम्-

**कण्टककेन्द्रचतुष्टयसंज्ञा सप्तमलग्नचतुर्थखभानाम्।**

**तेषु यथाभिहितेषु बलाढ्या कीटनराम्बुचराः पशवश्च ।।**[176]

मकरस्यपूर्वार्द्धं धनुषश्चोत्तरार्द्धं मेषसिंहवृषभाः चतुष्पदाः राशयो दशमभावे भवेयुस्तदा पूर्णमर्थात् रूपमितं बलं प्रयच्छन्ति । कर्कवृश्चिकमकरपूर्वार्द्धाः कीटसंज्ञकाः राशयः सप्तमस्थाः पूर्णबलिनस्तथा लग्ने शून्यबलयुक्ताः भवन्ति । कुम्भमीनमकरस्योत्तरार्द्धाः जलचरराशयः चतुर्थस्थाने पूर्णबलिनो भूत्वा ६० षष्ट्यंशबलं प्राप्नुवन्ति। दशमस्थाश्च निर्बलिनो भवन्ति। अतः स्वनिर्बलस्थानात् यथा द्विपदादिराशयः अन्तरिताः भवन्ति, तथैव तेषां बलाभिवृद्धिर्भवति । सूक्ष्मभावदिग्बलानयनमनुपातेन ग्रहस्य दिग्बलसाधनवत् क्रियते । वराहमिहिरानुसारेण गुरुबुधयोर्दृष्ट्या अपि भावो बली भवति। शुभग्रहदृष्ट्या अपि भावस्य बलं वर्द्धते।

| **भावराशयः** | **१** | **२** | **३** | **४** | **५** | **६** | **७** | **८** | **९** | **१०** | **११** | **१२** |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| **नरराशयः ३.६.७.११.उ.** | ६० | ५० | ४० | ३० | २० | १० | ०० | १० | २० | ३० | ४० | ५० |
| **जलचरराशयः ४.१२.१०. उ.** | ३० | ४० | ५० | ६० | ५० | ४० | ३० | २० | १० | ०० | १० | २० |
| **चतुष्पदराशयः १.२.५.१०. पू.** | ३० | २० | १० | ०० | १० | २० | ३० | ४० | ५० | ६० | ५० | ४० |
| **कीटराशयः ८** | ०० | १० | २० | ३० | ४० | ५० | ६० | ५० | ४० | ३० | २० | १० |

176बृ.जा., अ.-१, श्लो.-१७

**भावदिग्बलबोधकं चक्रम् (षष्ठ्यंशेषु)**

चक्रेऽस्मिन् प्रतिपादितं स्थूलबलं भवति । इतोऽप्यधिकं भावदिग्बल-सूक्ष्मानयनार्थं निम्नलिखितं सूत्रमस्ति-

नरराशिभावः- सप्तमभावः = तद्भावस्य दिग्बलम्

३

चतुष्पदराशिभावः – चतुर्थभावः = तद्भावस्य बलम्

३

कीटसंज्ञकराशिभावः – लग्नभावः = तद्भावस्य बलम्

३

जलचरराशिभावः – दशमभावः = तद्भावस्य बलम्

उदाहरणेनात्र स्पष्टीक्रियते-

लग्नभावस्पष्टः –

८-०६-२८-२६

२-०६-२८-२८

५-२९-५९-५८

५/२९/५९/५८ = ००/५९/५९ प्रथमभावस्य दिग्बलम् ।

३

द्वितीयभावस्पष्टः –

९-११-५८-११

११-२२-५७-३६

०९-१९-००-३५

१२/००/००/०० – ०९/१९/००/३५

०२/१०/५९/२५ = ००/२३/३९ द्वितीयभावस्य दिग्बलम् ।

३

तृतीयभावस्पष्टः –

१०-१७-२७-५३

०२-०६-२८-२८

०८-१०-५९-२५

१२/००/००/०० – ०८/१०/५९/२५

०३/१९/००/३५ = ००/३६/२० तृतीयभावस्य दिग्बलम् ।

३

चतुर्थभावस्पष्टः –

११-२२-५७-३६

०५-२२-५७-३६

०६-००-००-००

०६/००/००/००          ०२ =  ६०/०० चतुर्थभावस्य दिग्बलम् ।

३

पञ्चमभावस्पष्टः –

१२-१७-२७-५३

११-२२-५७-३६

००-२४-३०-१७

००/२४/३०/१७       = ००/०८/१० पञ्चमभावस्य दिग्बलम् ।

३

षष्ठभावस्पष्टः –

०१-११-५८-११

११-२२-५७-३५

०१-१९-००-३५

०१/१९/००/३५       = ००/१६/२० षष्ठभावस्य दिग्बलम् ।

३

सप्तमभावस्पष्टः –

०२-०६-२८-२८

०२-०६-२८-२८

००-००-००-००

= ००/००/०० सप्तमभावस्य दिग्बलम् ।

अष्टमभावस्पष्टः –

०३-११-५८-११

०५-२२-५७-३६

०९-१९-००-३५

१२/००/००/०० – ०९/१९/००/३५ = ००/२३/३९ अष्टमभावस्य दिग्बलम् ।

नवमभावस्पष्टः –

०४-१७-२७-५३

११-२२-५७-३६

०४-२४-३०-१७

०४-२४-३०-१७ = ४८/१० नवमभावस्य दिग्बलम् ।

३

दशमभावस्पष्टः –

०५-२२-५७-३६

०२-०६-२८-२८

०३-१६-२९-०८

०३/१६/२९/०८ = ३५/२९ दशमभावस्य दिग्बलम् ।

३

एकादशभावस्पष्टः –

०६-१७-२७-५३

०२-०६-२८-२८

०४-१०-५९-२५

०४/१०/५९/२५ = ४३/३९ एकादशभावस्य दिग्बलम् ।

३

द्वादशभावस्पष्ट: -

०७-११-५८-११

०८-०६-२८-२८

११-०५-२९-४३

११/०५/२९/४३ = ०८/१० द्वादशभावस्य दिग्बलम् ।

३

**४.१८.२ भावदृग्-बलम्**

षड्बलसाधनप्रसङ्गे साधितग्रहाणां दृग्-बलसाधनमिव भावदृग्-बलसाधनं क्रियते । बलेऽस्मिन् सूर्यादयो ग्रहाः द्रष्टारः तन्वादिभावाः दृश्याश्च भवन्ति । दृश्यभावद्रष्टाग्रहयोरन्तरानन्तरं शेषसंख्यां ग्रहस्य दृग्-बलगणितप्रक्रियावत् साधयते। द्वादशभावोपरि सूर्यादिसप्तग्रहाणां दृग्-बलसाधनं पिष्टपेषणमात्रमेवास्ति यतो हि ग्रहस्य दृग्-बलनिरूपणावसरेऽस्य विशदरूपेण वर्णनं विहितम्, तथाप्येकेनोदाहरणेनात्र भावदृग्-बलं साध्यते । यथा-

सूर्यस्य प्रथमभावोपरिदृष्टिः –

लग्नस्पष्टः = ०८-०६-२८

शनिस्पष्टः = ००-२४-३७

०७-११-५१

राशिजाङ्कः = ७, दृष्टिपादाङ्कः = ३, गतगम्यान्तरम् = -१

०१ x ११/५१ = ००/२३/४२ = ०३/००/००

३०                                  ००/२३/४२

०२/३६/१८

०२/३६/१८          = ३९'/ ०४''४

### ४.१९ विश्वकबलस्पष्टानयनविधिः

वर्गाद्यनुसारं प्राप्तं विश्वकं बलं स्वविश्वकबलेन गुणीकृत्य विंशतिसंख्यया विभज्येत। लब्धं च स्पष्टविश्वकबलं भवति । यथोक्तं पाराशरहोराशास्त्रे-

**वर्गविश्वाः स्वविश्वघ्नाः पुनर्विंशतिभाजिताः ।**

**विश्वा फलोपयोग्यं तत्पञ्चोनं फलदं न हि ।।**[177]

विंशोपकबलं यदि १५ संख्यातः २० संख्यान्तं पूर्णफलदम्, १० संख्यातः १५ संख्यान्तं मध्यमफलदम्, ५ संख्यातः हीनं च शून्यफलदं भवति । यथोक्तं पाराशरहोराशास्त्रे-

**तदूर्ध्वं स्वल्पफलदं दशोर्ध्वं मध्यमं स्मृतम् ।**

**तिथ्यूर्ध्वं पूर्णफलदं बोध्यं सर्वं खचारिणाम् ।।**[178]

वस्तुतः ग्रहाणां फलाधारस्तु वर्गाणां विंशोपकबलमेवास्ति । अतोऽत्र गणितमाध्यमेन षड्वर्गबलसाधनं कृतमस्ति ।

| **ग्रहाः** | **राशीशः** | **सम्बन्धः** | **वर्गविश्वः** | **स्वविश्व/वर्गविश्व** | **विंशोपकम्** |
|---|---|---|---|---|---|
| सूर्यः | भौमः | सम | १० | ६x१०/२०= | ३ |
| चन्द्रः | चन्द्रः | स्वगृही | २० | ६x२०/२०= | ६ |
| भौमः | शुक्रः | शत्रुः | ७ | ६x७/२०= | २.१ |
| बुधः | भौमः | शत्रुः | ७ | ६x७/२०= | २.१ |
| गुरुः | गुरुः | स्वगृही | २० | ६x२०/२०= | ६ |
| शुक्रः | भौमः | शत्रुः | ७ | ६x७/२०= | २.१ |
| शनिः | शुक्रः | सम | १० | ६x१०/२०= | ३ |

षड्वर्गबलम् (होराकुण्डल्याम्)

---

[177]बृ.पा.हो.शा., अ.-८, श्लो.-२६

[178]बृ.पा.हो.शा., अ.-८, श्लो.-२७

| ग्रहाः | राशीशः | सम्बन्धः | वर्गवि. | स्वविश्व/वर्गविश्व | विंशोपकम् |
|---|---|---|---|---|---|
| सू. | चन्द्रः | अधिमित्रम् | १८ | २१८/२०= | १.८ |
| च. | सूर्यः | अधिमित्रम् | १८ | २x१८/२०= | १.८ |
| भौ. | चन्द्रः | अधिमित्रम् | १८ | २x१८/२०= | १.८ |
| बु. | सूर्यः | सम | १० | २x१०/२०= | १.० |
| गु. | चन्द्रः | सम | १० | २x१०/२०= | १.० |
| शु. | सूर्यः | अधिशत्रु | ५ | २x५/२०= | ०.५ |
| श. | चन्द्रः | सम | १० | २x१०/२०= | १.० |

षड्वर्गबलम् (द्रेष्काणकुण्डल्याम्)

| ग्रहाः | राशीशः | सम्बन्धः | वर्गवि. | स्वविश्व/वर्गविश्व | विंशोपकम् |
|---|---|---|---|---|---|
| सू. | गुरुः | सम | १० | ४x१०/२०= | २ |
| च. | गुरुः | शत्रुः | ७ | ४x७/२०= | १.४ |
| भौ. | बुधः | अधिशत्रु | ५ | ४x५/२०= | १.० |
| बु. | भौमः | शत्रुः | ७ | ४x७/२०= | १.४ |
| गु. | भौमः | अधिमित्रम् | १८ | ४x१८/२०= | ३.६ |
| शु. | सूर्यः | अधिशत्रु | ५ | ४x५/२०= | १.० |
| श. | शनिः | स्वगृही | २० | ४x२०/२०= | ४.० |

षड्वर्गबलम् (नवांशकुण्डल्याम्)

| ग्रहाः | राशीशः | सम्बन्धः | वर्गवि. | स्वविश्व/वर्गविश्व | विंशोपकम् |
|---|---|---|---|---|---|
| सू. | भौमः | सम | १० | ५x१०/२०= | २.५ |
| च. | गुरुः | शत्रुः | ७ | ५x७/२०= | १.४ |
| भौ. | बुधः | अधिशत्रु | ५ | ५x५/२०= | १.२५ |
| बु. | भौमः | शत्रुः | ७ | ५x७/२०= | १.४ |
| गु. | बुधः | अधिशत्रु | ५ | ५x५/२०= | १.२५ |

| | | | | | |
|---|---|---|---|---|---|
| शु. | सूर्यः | अधिशत्रु | ५ | ५x५/२०= | १.२५ |
| श. | गुरुः | मित्र | १५ | ५x१५/२०= | ३.७५ |

षड्वर्गबलम् (द्वादशांशकुण्डल्याम्)

| **ग्रहाः** | **राशीशः** | **सम्बन्धः** | **वर्गवि.** | **स्वविश्व/वर्गविश्व** | **विंशोपकम्** |
|---|---|---|---|---|---|
| सू. | शनिः | अधिशत्रु | ५ | २x५/२०= | ०.५ |
| च. | शुक्रः | मित्रम् | १५ | २x१५/२०= | १.५ |
| भौ. | बुधः | अधिशत्रु | ५ | २x५/२०= | ०.५ |
| बु. | शुक्रः | सम | १० | २x१०/२०= | १.० |
| गु. | चन्द्रः | सम | १० | २x१०/२०= | १.० |
| शु. | बुधः | सम | १० | २x१०/२०= | १.० |
| श. | शुक्रः | सम | १० | २x१०/२०= | १.० |

षड्वर्गबलम् (त्रिंशांशकुण्डल्याम्)

| **ग्रहाः** | **राशीशः** | **सम्बन्धः** | **वर्गवि.** | **स्वविश्व/वर्गविश्व** | **विंशोपकम्** |
|---|---|---|---|---|---|
| सू. | बुधः | शत्रुः | ७ | १x७/२०= | ०.३५ |
| च. | भौमः | मित्रम् | १५ | १x१५/२०= | ०.७५ |
| भौ. | शुक्रः | शत्रुः | ७ | १x७/२०= | ०.३५ |
| बु. | भौमः | शत्रुः | ७ | १x७/२०= | ०.३५ |
| गु. | बुधः | अधिशत्रु | ५ | १x५/२०= | ०.२५ |
| शु. | गुरुः | शत्रुः | ७ | १x७/२०= | ०.३५ |
| श. | बुधः | सम | १० | १x१०/२०= | ०.५ |

षड्वर्गाणां विंशोपकम्

| ग्रहाः | राशि: | होरा | द्रेष्काण: | नवांश: | द्वादशांश: | त्रिंशांश: | योग: |
|---|---|---|---|---|---|---|---|
| सू. | ३.० | १.८ | २.० | २.५ | ०.५ | ०.३५ | १०.१५ |
| च. | ६.० | १.८ | १.४ | १.४ | १.५ | ०.७५ | १२.८५ |
| म. | २.१ | १.८ | १.० | १.२५ | ०.५ | ०.३५ | ७.०० |
| बु. | २.१ | १.० | १.४ | १.४ | १.० | ०.३५ | ७.२५ |
| गु. | ६.० | १.० | १.८ | १.२५ | १.० | ०.२५ | ११.३ |
| शु. | २.१ | ०.५ | १.० | १.२५ | १.० | ०.३५ | ६.२ |
| श. | ३.० | १.० | १.० | ३.७५ | १.० | ०.५ | १०.२५ |

षड्वर्गेषु सप्तांशवर्गयोजनेन सप्तवर्गाः भवन्ति । अतः सप्तवर्गाणां विंशोपकबलसाधनावासरे सप्तांशातिरिक्तं षड्वर्गाणां केवलं स्वविश्वादिकं निर्दिश्यते न तु स्थित्यादिकं, यतो हि पञ्चधामैत्र्यनुसारं तेषां स्थित्यादिकां तु पूर्ववदेव भवति । सप्तवर्गादीनां स्ववर्गस्य विश्वाः भिन्ना भवन्ति । एवमेव प्रकारेण दशवर्गाणां, षोडशवर्गाणां च साधनं क्रियते ।

## ४.२०होराशास्त्रे अतिपरिचितषड्वर्गीयस्वरूपम्

**दृक्काणहोरानवभागसंज्ञास्त्रिंशांशकद्वादशसंज्ञिताश्च ।**

**क्षेत्रं च यद् यस्य स तस्य वर्गी होरेति लग्नं भवनस्य चार्द्धम् ।।**

दृक्काणादयः षट् पदार्थाः स्वकीयग्रहस्य वर्गसंज्ञाः, तत्र दृक्काणे राशित्रिभागः, होरा राश्यर्द्धं, नवभागी नवांशकः, द्वादशांशे द्वादशभागः, त्रिंशांशे त्रिंशद्भागः भवति। यस्य ग्रहस्य क्षेत्रं(राशिः) स तस्य वर्गः (वर्गशब्दे नात्र षड्वर्गः ज्ञातव्यः) भवति । भगवान् गार्गिः – "क्षेत्रं होराऽथ दृक्काणो नवांशो द्वादशांशकः । त्रिंशांशश्च

वर्गोऽयं सर्वस्य समुदाहृतः ।।” अत्र भट्टोत्पलेन यत् गार्ग्यमतं प्रदर्शितं तत् वराहमिहिरतः, पुरातनं प्रतिभाति किन्तु गर्गसंहिताकर्तुः पश्चात् अर्थात् गर्गानन्तरं मतं प्रदर्शितमस्तीति स्पष्टम् । सः गर्गः कियान् प्राचीनः इति तज्जीवनवर्णनावासरे प्रकाशयिष्यते । अत्र हि द्रेक्काणशब्दः पुरातनसंस्कृतवाङ्मयेऽपि नोपलभ्यते । (तथापि दृक्काणो राशित्रिभागः स्वभवन-सुत-त्रित्रिकोणाधिपानां सम्बन्धिनो दृक्काणा: भवन्ति)।होराशब्दस्य विवेचनं पूर्वमभिहितमेव (तत्र प्रथमा होरा सूर्यस्य, द्वितीया होरा चन्द्रस्य, होराशब्देनात्र राश्यर्द्धमुच्यते)। नवभागराशिः नवमांशः (नक्षत्रचतुर्थांशभारतीयकल्पनानुसारेण) । त्रिंशांशकल्पना अपि न भारतीया । द्वादशांशकल्पना भारतीयानामेवेति निश्चयेन वक्तुं पार्यते ।

## ४.२१ शुभाशुभफलादेशे होराशास्त्रस्य प्रमुखतत्त्वानि वात्रीण्युपकरणानि

होराशास्त्रे फलादेशज्ञानाय त्रीण्युपकरणानिप्राप्यन्ते- ग्रहः, राशिः, भावश्च। यद्यत्र ज्योतिषशास्त्रं मनोविज्ञानमाध्यमेन ज्ञेयन्तदा ज्ञायते यद् ग्रहाः स्वस्थित्यनुसारं फलदातारो भवन्ति । यतोहि ते फलदानाय स्वतन्त्राः न सन्ति । कश्चिदपि ग्रहः कस्याञ्चिद्राश्यां स्थितो भवति, तद्राश्यनुसारं च फलति अन्यथा सामान्यभाषायां‘गगनस्थाः ग्रहाः’ इति। पूर्वोक्तप्रकरणे ग्रहाणां विविधबलं वर्णितमस्ति अतोऽत्र राश्यनुसारेण भावफलं प्रस्तुतमस्ति। सकलाः राशयोऽपि स्वगुणधर्मान् भावानुरूपं स्वीकुर्वन्ति । यथाबृहत्पाराशर्यां स्थानान्तरानुगुण्येन भवतः फलदायकैः इति । महर्षिः पाराशरो द्वादशभावेषु त्रिकोणेशान् एव शुभान्मन्यते। त्रिषडायेशान् चाशुभान् मन्यते । अष्टमेशःभाग्यस्थानस्य व्ययाधिपतित्वेन परम् अशुभं, द्वितीयेशं सप्तमेशञ्च मारकु कथयति पाराशरः ।

अतएव यस्य विषयस्य विचारो द्वादशभावेभ्यःक्रियते ग्रहाः राशयश्चापि भावानुरूपमेव फलदातारो भवन्ति । अतोऽत्र भावचर्चा क्रियते ।

**४.२२ द्वादशभावानां परिचयः**

भवन्ति इति भावाः, भवन्त्यनेनेति भावाः, भवन्त्येभ्यः एषु वा मेषादयः ग्रहसहिताः इत्यादिव्युत्पत्त्या सत्तार्थकाद् भूधातोः 'घञ्' प्रत्यये, अत्र पारिभाषिकोऽयं 'भाव' इति शब्दः लाक्षणिकश्च । यतो हि तत्तच्छास्त्रानुसारं 'भाव' इत्यस्यार्थः पृथक् सन्दर्भे दृग्गोचरो भवति । किन्तु ज्योतिषशास्त्रानुसारेण जन्मकुण्डल्यां द्वादशराशयः सन्ति, तेषां राशीनां द्वादशप्रतीकरूपद्वादशभुवनानि एव भावाः उच्यन्ते । द्वादशाङ्गो वै पुरुषः(आपस्तम्बसूत्रम्) इति श्रुतिवचनानुसारं ज्योतिशस्य वेदमूलकत्वात् जातकस्य जन्मकुण्डल्यां द्वादशभावाः भवन्ति । दैवज्ञैः ते द्वादशभावाः लग्नादिभिः, तन्वादिभिश्च संज्ञाभिः संज्ञिताः सन्ति । तत्र कस्मिन् भावे जातकस्य किं किं द्रष्टव्यम् ? एते द्वादशभावाः कैः पर्यायैः व्यवह्रियन्ते ? द्वादशभावानां वर्ण्यविषया: के ? इति जिज्ञासायाम् अत्र एकैकशः विवरणं विधीयते।

लग्नात् क्रमशो द्वादशभावनामानि १ देहः, २ द्रव्यम्, ३ पराक्रमः, ४ सुखम्, ५ सुतः, ६ शत्रुः, ७ कलत्रम्, ८ मृतिः, ९ भाग्यम्, १० राजपदम्, ११ लाभः, १२ व्ययः इति । अर्थात् लग्नं शरीरं प्रथमो भावः, द्वितीयो द्रव्यम्, तृतीयः पराक्रमः, एवमेव अत्राऽपि बोधव्यम्।

**४.२३ द्वादशभावेभ्यः विचारणीयविषयाणां विवेचनम् इदानीं क्रियते**

**४.२३.१ प्रथमभावाद् विचार्यविषयाः**

तनुभावः अथवा लग्नस्थानम्, तदन्तर्गतत्वेन पर्यायत्वेन वा होरा, मूर्तिः, उदयः, शिरः, देहः, कल्पः, जन्म, आद्यम्, अङ्गम्, विलग्नम्, आत्मा, शरीरम्, वपुः, कण्टकम्, चतुष्टयम्, गुप्तम् एवञ्च केन्द्रभावः इत्येते गृह्यन्ते, अर्थात् एतेषां विचारः प्रथमभावस्थितदृष्टग्रहराश्यनुसारं विधीयते ।

भावेनानेन तनुः, रूपम्, ज्ञानम्, वर्णम्, बलाबलम्, सुखम्, दुःखम्, स्वभावः, प्रकृतिश्चेत्यादिकाः विषयाः विविच्यन्ते । यथा-

**तनु रूपं च ज्ञानं च वर्णं चैव बलाबलम्।**

**प्रकृतिं सुख-दुःखं च तनुभावाद् विचिन्तयेत् ।।**[179]

किन्तु वैद्यनाथमहाभागेन स्वविवेकेन अन्यदपि विचारार्थं लिखितम्, तनुभावतः शरीरस्य वर्णः, आकृतिः, रूपं तु विचारणीयान्येव, एतदतिरिक्तं लक्षणं-गुणो, यशः, स्थानं, प्रवासस्तेजो बलमपि विचारणीयानि भवन्ति ।[180]यदि लग्ने शुभराशिः, लग्नेशो लग्नं पश्यति, लग्नेशः केन्द्रे त्रिकोणे वा स्थितः शुभग्रहयुतो द्रष्टो वा । यदि लग्नेशः षष्ठेऽष्टमेद्वादशे वा स्थितस्तदा जातकस्य देहसुखं न भवति, लग्नेपापग्रहाः, लग्नेशो निर्बलः स्यात्तदा जातको विविधाभिः शङ्काभिः युक्तो भूत्वा रोगेण चिन्तया च ग्रस्यते ।[181]

## ४.२३.२ द्वितीयभावाद् विचार्यविषयाः

179 बृहत्पाराशरहोराशास्त्रम्, १२/२

180 शरीरवर्णाकृतिलक्षणानि यशो गुणस्थानसुखासुखानि। प्रवासतेजोबलदुर्बलानि फलानि लग्नस्य वदन्ति सन्तः ।। जातकपारिजातः ११/१३

181 देहाधीशः स पापो व्ययरिपुमृतिगश्चेत्तदा देहसौख्यं
न स्याज्जन्तो निजर्क्षे व्ययरिपुमृतिपस्तत्फलस्यैव कर्ता ।
मूर्तौ चेत् क्रूरखेटस्तदनु तनुपतिः स्वीयवीर्येणहीनो
नानातङ्काकुलः स्याद् व्रजति हि मनुजो व्याधिमाधिप्रकोपम्।। जातकालङ्कारः२/२

धनभावः तदन्तर्गतत्वेन वा भावेनानेन वित्तम्, द्रव्यम्, धनम्, कोशः, पित्तम्, वाक्, भुक्तिः, नयनम्, धान्यम्, कुटुम्बम्, मृत्युः, शत्रुः, धातुरत्नादिक श्चेत्यादिकाः विषयाः विविच्यन्ते । भावोऽयं पणफरनाम्नापि गृह्यते । अर्थात् एतेषां विषयाणां विचारः द्वितीयभावस्थितदृष्टग्रहराश्यनुसारं विधीयते । यथा जातकाभरणे मानसागर्याञ्च –

**स्वर्णादिधातुक्रयविक्रयश्च रत्नानि कोषोऽपि च सङ्गहश्च।**

**एतत्समस्तं परिचिन्तनीयं धनाभिधाने भवने सुधीभिः ।।**

अस्मिन्विषये डॉ. नेमिचन्द शास्त्री महाभागेन एतदतिरिक्तमपि लिखितम्। भारतीयज्योतिषशास्त्रे धनभावतः कुलम्, मित्रम्, नेत्रे, कर्णौ, नासिका, स्वरः, सौन्दर्यम्, गीतम्, प्रेम, सत्यभाषणम्, सञ्चितधनमपि विचारणीयम्। यथा जातकपारिजाते-

**वित्तं नेत्र मुखं विद्या वाक्कुटुम्बाशनानि च ।**

**द्वितीयस्थानजन्यानि क्रमाज्ज्योतिर्विदो विदुः ।।**

यदि धनेशः स्वगृही, लाभस्थो, मित्रगृहे, उच्चस्थो वा भूत्वा लाभस्थः स्यात्, शुभग्रहयुतो वा एवम्भूतो जातको धनधान्यपूर्णः भवति । सुखी प्रख्याताश्च कथ्यते । किन्तु धनेशः शुक्रचन्द्रो दुर्बलाः, पापद्रष्टारः, शुभग्रहदृष्टिहीनाः, त्रिकस्थाः वा स्युस्तदा जातको निशान्धो जायते । यथा जातकालङ्कारे- “शुक्रेन्दुभ्यां संयुते नेत्रनाथे निश्यन्धः स्यात् पापदृष्टे शुभैर्नः ।” किन्तु पूर्णो बली गुरुर्यदि धनेशो भूत्वा द्वितीयभावस्थः स्यात्, सूर्यशुक्रदृष्टो वा तदा जातको व्याकरणज्ञो भवति । यथा जातकरत्ने-

**गुरौ धनस्थे बलपूर्णयुक्ते शुक्रेण सूर्येण च दृष्टियुक्ते।**

**शुक्रे धने स्वोच्चगतेऽथवाऽपि जातो नरः शब्दविशेषशास्त्रात्।।**

## ४.२३.३ तृतीयभावाद् विचार्यविषयाः

भ्रातृभावः, तदन्तर्गतत्वेन पराक्रमः, विक्रमः, सहजः, सहोदरः, भ्राता, वीर्यम्, सहोत्थम्, जलम्, मृत्युः, यात्रा, पितृमरणञ्चेत्यादिकाः विषयाः विविच्यन्ते।[182] स्थानमिदं उपचयस्थाननाम्नापि ज्ञायते । एतदतिरिक्तं तृतीयभावतः सेवकादिकम्, स्वाश्रितजनादिकमपि विचारणीयम्। यथा जातकाभरणे- " सहोदराणामय किङ्कराणां पराक्रमाणामुपजीविनां च ।" उपर्युक्तानां विषयाणां विचारः तृतीयभावस्थितदृष्टग्रहराश्यनुसारं विधीयते । यस्य जन्मकुण्डल्यां पराक्रमेशो भौमेन सह त्रिकस्थः स्यात् स जातको बन्धुहीनो जायते । यथा- "अग्रजं च रविर्हन्ति पृष्ठजातं शनैश्चरः । अग्रजं पृष्ठजं हन्ति सहजस्थो धरासुतः ।।"[183] यदितृतीयेशः(पराक्रमेशो) स्वगृही स्यात्, शुभग्रहयुतः एवं दृष्टः, केन्द्रस्थः स्यात्तदा बन्धुसुखं पूर्णं भवति । पापग्रहैः सह स्थितिरेषा भवति तदा बन्धुसुखं न स्यात् ।[184]

## ४.२३.४ चतुर्थभावाद् विचार्यविषयाः

सुखभावः, तदन्तर्गतत्वेन शौर्यम्, कर्णः, सुखम्, अम्बु, वाहनम्, बान्धवाः, मातृसुखम्, धनम्, क्षेत्रम्, चिबुकम्, पातालम्, हृदयम्, मित्रम्, बुद्धिः

---

182 जातकपारिजातः १२/१

183 जातकाभरणे सहजभावविचारे-३

184 भ्रातृस्थानेशभूमौ व्ययरिपुनिधनस्थानगौ बन्धुहीनः
स्वक्षेत्रे सौम्यदृष्टे सहजभवनपे मानवः स्याच्च तद्वान् ।
केन्द्रस्थे बन्धुसौख्यं शुभविहगयुते स्याद्दभ्रं नराणां
पापैश्चेदन्यथैतत् तदनु निजधिया ज्ञेयमित्थं समस्तम्।। जातकालङ्कारः, भावाध्यायः ७

गृहश्चेत्यादिकाः विषयाः विविच्यन्ते । स्थानमिदं केन्द्रम् एवञ्च तुर्यभावः इत्येतेन गृह्यते । कैश्चिद् विद्वद्भिः विद्या, राज्यादिकमपि विचारणीयमिति उक्तम्। यथा जातकपारिजाते-

**वदन्ति विद्याजननीसुखानि सुगन्धागोबन्धुमनोगुणानि।**

**महीपायानक्षिनिमच्छिद्राणि चतुर्थभावप्रभवानि तज्ज्ञाः।।**[185]

अनेन भावेन उपर्युक्तानां विचारः चतुर्थभावस्थितदृष्टग्रहराष्यानुसारं विधीयते । यदि सुखेशः सुखभावस्थः सुभग्रहयुतो दृष्टो वा, बुधो बली स्यात्तदा जातको विद्या विनययुतश्चतुरो च भवति । यदि नवमेशेन सह सुखेशः स्वराशौ शुभग्रहयुतः स्यात्तदा जातको नृपो भवति । यदि हि 'सुखस्य हेतुरहि भाग्यम्' अतो भाग्येशसुखेशयोर्मिलनं'विशिष्टायाः विशिष्टेन सङ्गमो गुणवान् भवेत्' इत्यनुसारं राजयोगः स्वयं सिद्धो भवति । यदि चतुर्थेशो लग्नस्थो गुरुदृष्टश्च तदा जातको राजपूज्यो भवति ।[186] लग्नेशेन सह सुखेशोऽपि स्वगृही स्यात्तदा सहसा गृहलाभो भवति। मित्रैः सह मित्रता च चिरस्थायिनी भवति। यथा जातकालङ्कारे- "स्वक्षेत्रे तुर्यनाथस्तनुपतिसहितः स्यादकस्माद् गृहाप्तिः ।"

## ४.२३.५ पञ्चमभावाद् विचार्यविषयाः

पुत्रभावः, तदन्तर्गतत्वेन प्रभावः, तनुजम्, आत्मजः, वाणी, विवेकः, यन्त्रमन्त्रौ, विद्या, बुद्धिः, प्रबन्धः,उदरप्रदेशः, भक्तिः, पितृनन्दनः, राज्यच्युतिश्चेत्यादिकाः विषयाः विविच्यन्ते । भावोऽयं पणफर इति नाम्नापि

---

185 जातकपारिजातः १२/५९

186 पातालेशः स्वराशौ शुभखचरयुतो भाग्यनाथेन युक्तः
सामन्तः स्यात्ततश्चेत्सुरपतिगुरुणा वाहनेशस्तनुस्थः।
सुदृष्टो राजपूज्यस्तदनु च हिबुकाधीश्वरो लाभसंस्थो
यानं पश्येन्नरानां निवहमभिहितं वाहनानां प्रदत्ते ।। जातकालङ्कारः, भावाध्यायः- ७

ज्ञायते। अनेन भावेन अर्थात् त्रिकोणस्थितपञ्चमभावस्थितदृष्टग्रहराष्यनुसारं उपर्युक्तानां विचारः विधीयते । केषाञ्चिन्मते जनकमपि विचारणीयं भवति । सबली विद्येशो विद्याभिवृद्धिं, निर्बलो विद्येशश्च विद्याहानिं करोति । अतः पञ्चमेशः त्रिकभावगतः(६,८,१२) विद्याहानिं, केन्द्रगतः त्रिकोणगतो वा विद्याप्राप्तिं करोति । यदि पञ्चमेशो लग्नान्नवमः केन्द्रस्थः स्वराशिभ्यो वा स्यात्तदा जातको विद्वान् भवति ।[187] मानवजीवने सन्तानलाभो महत्त्वपूर्णो विषयो वर्तते, यस्य विचारः पञ्चमभावतः क्रियते ।अतः सामान्यतया भावसम्बन्धिविचारः, यथा- भावेशः(पञ्चमेशः) उत्तमस्थानस्थः, उच्चराशिस्थः, स्व राशिस्थो, मूलत्रिकोणस्थो, मित्रक्षेत्रस्थः केन्द्रगो वा स्यात्तदा भावः प्रबलः, अ एव भावेशः त्रिकस्थो, नीचराशिगः, शत्रुक्षेत्रगोऽस्तं गतो वा स्यात्तदा भावो दुर्बलो भवति । भावः शुभग्रहयुतो दृष्टो वा स्यात् किन्तु पापग्रहैः स्पृष्टोऽशुभः, पापग्रहैरस्पृष्टः शुभो भवति । यथा-**“यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वास्यात्तस्य तस्याभिवृद्धिः।”** पञ्चमभावः पञ्चमेशो वा बली स्यात् तदा विद्याविनयादिकं सर्वं वर्धत एव । अन्यथा जातको मूको, मन्दबुद्धिः सन्तानहीनश्च भवति ।[188] किन्तु महर्षिः पाराषारः पञ्चमेशं(सुतेशं) पूर्णरूपेण शुभफलदातारं कथयति, अर्थात् त्रिकोणेशः(पञ्चमेशः) स्वयं क्रूरः पापयुतोऽपि शुभफलदातारं कथयति । यथा- “सर्वे त्रिकोणनेतारो ग्रहाः शुभफलप्रदाः ।” इति। तदुपरि केन्द्रेशस्य त्रिकोणेशस्य च सम्बन्धमात्रमेव

---

[187] जातकालङ्कारः, भावाध्यायः-११

[188] वाक्स्थानेशो गुरुर्वा व्ययरिपुविलयस्थानगो वाग्विहीनः
श्चैवं पित्रादिकानां पतय इह युता मूकता स्याच्च ताभ्याम्।
वागीशात् पञ्चमेशस्त्रिकभवनगतः पुत्रधर्माङ्गनाथा
रन्ध्रेद्वेष्यान्तिमस्था यदि जनुषि नृणां मात्मजानामभावः।।जातकालङ्कारः, भावाध्यायः-१२

शुभफलदाता भवति । यथालघुपाराशर्याम्- “केन्द्रत्रिकोणनेतारौ दोषयुक्तावा-पिस्वयम्। सम्बन्धमात्राद् बलिनौ भवेतां योगकारकौ।।”[189]

## ४.२३.६ षष्ठभावाद् विचार्यविषयाः

शत्रुभाः, तदन्तर्गतत्वेन रोगः, रिपुः, मातुलः, सपत्नी-माता, शस्त्रम्, भयम्, द्वेषः, अरिः, वैरी, व्यसनम्, चौर्यम्, विघ्नम्, रोगाश्चेत्यादिकाः विषयाः विविच्यन्ते । भावोऽयं आपोक्लिमभावः वा उपचयभावः कथ्यते । अनेन षष्ठभावेन स्थितदृष्टग्रहराश्यनुसारम् उपर्युक्तविषयाणां विचारः विधीयते । यदि षष्ठे गृहे पापग्रहदृष्टिर्योगो वा स्यात्तदा शत्रवो रोगाश्च नश्यन्ति । यदि शुभग्रहदृष्टो युतो वा तदा शत्रुरोगादिकाः वर्द्धन्ते । षष्ठेशो यदि लग्नस्थो स्यात्तदा शत्रवः स्वयमेव नश्यन्ति। यदि षष्ठेशो धनस्थस्तदा तस्य धनं तस्यैव पुत्रो गृह्णाति । तृतीयस्थःषष्ठेशः नाभिरोगान् जनयति, ग्रामीणान् पीडयति च ।[190] यस्य जातकस्य लग्नाद् राहुकेतुर्वाषष्ठस्थः स्यात्तस्यौष्ठे दन्ते वा रोगाभिवृद्धिर्भवति। षष्ठेशयुक्तः पापग्रहो लग्ने स्यात्तदा जातकदेहे व्रणाः भवन्ति । एवमेव षष्ठेशः सपापोऽष्टमस्थो भवति तदा जातकः स्वयं गुदा(बवासीर)रोगी भवति ।[191] किन्तुढुण्ढिराज दैवज्ञेन शत्रुभाव-फलविचार: भिन्न: कथितः- यथा-

**“दृष्टिर्युतिर्वा खलखेचराणामरातिभावेऽरिविनाशनं स्यात् ।”**

**शुभग्रहाणां युतीदृष्टितोऽत्रशत्रूद्गमोप्यामयसम्भवः स्यात् ।।”**[192]

---

189 लघुपाराशरी, योगाध्यायः-२

190 षष्ठेशे लग्नयाते भवति हि मनुजो वैरिहन्ता धनस्थे ।
पुत्रात्तार्थोऽतिदुष्टः सहजभवनगे ग्रामदुःखाकरः स्यात् ।। जातकालङ्कारः, भावाध्यायः-१९

191 जातकपारिजातः, १३/७७

192 चमत्कार चिन्तामणि का तुलनात्मक स्वाध्याय, पं. ब्रजविहारी लाल शर्मा द्वारा लिखित शनिफल अध्याय में, लग्नचन्द्रिकायां २/३०

आचार्यकाशीनाथस्यापेतन्मतम्- यदि षष्ठभावे भौमः स्यात् तदा जातकः शत्रुहीनो, धनधान्यसम्पन्नो, पुष्टदेहः, स्त्रीलोलुपः, शुभान्तःकरणो च भवति ।[193]

### ४.२३.७ सप्तमभावाद् विचार्यविषयाः

कलत्रभावः, तदन्तर्गतत्वेन स्त्री, जामित्रः, यामित्रः, अङ्गना, दारा, भार्या, सौभाग्यम्, कामः, मार्गः, यात्रा, व्यापारः, सम्पत्, द्युतम्, भर्ता, दधि, सूपः, नष्टवस्तूनि, मृत्युश्चेत्यादिकाः विषयाः विविच्यन्ते ।कण्टकम्, चतुष्टयम् इत्यादिनामभिः भावोऽयं प्रसिद्धोऽस्ति । अनेन सप्तमभावस्थितदृष्टग्रहराश्यनुसारं उपर्युक्तानां विषयाणां विचारः विधीयते । सप्तमेशो यदि स्वगृही, स्वनवांशे वा उच्चावस्थास्थस्तदापूर्णं स्त्रीसुखं लभते जातकः, किन्तु सप्तमेशोऽन्यत्र सन् षष्ठाष्टमद्वादशस्थानेषु स्यात् तदा स्त्री रुग्णा भवति । शुक्रः सप्तमस्थो भूत्वा सपापः स्यात्तदा स्त्रीहानिकारको भवति । यथा**"शुक्रः खलान्तरगतः सखलः सिताद्वा । पापा व्ययास्तमृतिगा रमणीहराः स्युः ।।"**[194] यदि जायेशो बलवान् भूत्वा शुभग्रहयुतो दृष्टो वा तदा जातकः सर्वसम्पत्तिवान् भवति । शनि-राहु-केतवो यदि सप्तमे स्युस्तदा हीनजात्या रजस्वलया सङ्गो जायते । गुरौ सप्तमे सति ब्राह्मण्या गर्भिण्या वा सह सङ्गो भवति । किन्तु यदि सप्तमस्थौ शुक्रभौमौ भवेतां तदा जातको जायाहीनो भवति ।[195]लघुपाराशरी ग्रन्थे महर्षिपाराशरः सप्तमस्थानं जातकस्य

---

[193] वाक्स्थानेशो गुरुर्वा व्ययरिपुविलयस्थानगो वाग्विहीनः
श्चैवं पित्रादिकानां पतय इह युता मूकता स्याच्च ताभ्याम्।
वागीशात् पञ्चमेशस्त्रिकभवनगतः पुत्रधर्माङ्गनाथा
रन्ध्रेद्वेष्यान्तिमस्था यदि जनुषि नृणां मात्मजानामभावः।।जातकालङ्कारः, भावाध्यायः-१२

[194]स्वर्क्षे स्वोच्चे तु जायेशे पूर्णं जाया सुखं वदेत् कलत्रपे विना स्वर्क्षं स्थितः षष्ठेष्टमे व्यये।
रोगिणीं कुरुते नारीं तथा तुङ्गादिकं विना सप्तमे तु स्थिते शुक्रेऽतीव कामी भवेन्नरः ।। बृ.पा. हो. शा.१९/१-३

[195] द्यूने कुजभार्गवयोर्जातःपुरुषो भवेद्विकलदारः। सारावली ३४/५१

मृत्योः एकं विशेषं कारणं मन्यते कारणं यत् सप्तमस्थानम् अष्टमस्थानाद् द्वादशस्थानमस्ति अतः सप्तमभावः आयुः नाशयति इत्थं सः मारकः कथ्यते । यथा- **“अष्टमं ह्यायुषः स्थानं अष्टमादष्टमं च यत् । तयोरपि व्यवस्थानं मारकस्थानमुच्यते।।”**

### ४.२३.८ अष्टमभावाद् विचार्यविषयाः

आयुष्यभवनम्(रन्ध्रभावः), तदन्तर्गतत्वेन मृतिः, मृत्युः, नाशः, जीवनम्, युद्धम्, विनाशनम्, अन्तकः, मूत्रकृच्छ्रम्, गुह्यम्, ऋणदानग्रहणम्, गुदारोगाः, पूर्वजन्म, आयुश्चेत्यादिकाः विषयाः विविच्यन्ते । भावोऽयं त्रिकभावः वा चतुरस्रभावनाम्ना प्रसिद्धोऽस्ति । उपर्युक्तानां विषयाणां विचारः अष्टमभावस्थितदृष्टग्रहराश्यनुसारं विधीयते । अष्टमेशः यदि स्वगृही स्यात्तदा जातको दीर्घायुर्भवति, लग्नेशोऽष्टमेषश्च शष्ठस्थौ द्वादशस्थौ वा स्यातां तदापि जातको दीर्घायुर्भवति । दशमेशोष्टमेशो बलिनः स्युः तथा शनियोगो न स्यात्तदा जातकश्चिरायुर्जायते।[196] यदि जन्मकुण्डल्यां लेग्नेशोष्टमेशः एक एव ग्रहः स्यात् तदा स शुभफलदायको भवति ।[197] कतिचिद्विदुषां मते अष्टमस्थिताः ग्रहाः दुष्टाः भवन्ति । विशेषेण जन्मकाले अष्टमस्थः छन्दः मृत्युदायको भवति । यथा- “खेटाः सर्वे महादुष्टाः अष्टमस्थानमाश्रिताः। शशाङ्कस्तु विशेषेण जन्मकाले च मृत्युदः ।।”

---

[196]स्वस्थे रन्ध्रपतौ चिरायुरुदयाच्छिद्राधिपौ षष्ठगौ रिष्फस्थौ यदि वा समेति मनुजो जातश्चिरायुर्बलम्।
व्यापारोदयरन्ध्रराशिपतयः केन्द्रत्रिकोणायगा दीर्घायुविबलाःसभानुतनया यद्यल्पमायुर्वदेत्।।
जातकपारिजातः१४/४९-५०

[197] भाग्यव्ययाधिपत्येन रन्ध्रेशो न शुभप्रदः । स एव शुभ सन्धाता लग्नाधीशोऽपि चेत्स्वयम्।। लघुपाराशरी ९

एवमेव यदि शुक्रो अष्टमस्थः स्यात्तदा जातको दीर्घायुः, अतिसुखी, धनी, राजतुल्यः, सर्वसन्तुष्टी च भवति ।[198]

### ४.२३.९ नवमभावाद् विचार्यविषयाः

धर्मभावः, तदन्तर्गतत्वेन भाग्यम्, लाभः, गुरुः, शुभम्, तपः, पैतृकम्, पुण्यम्, मुक्तिः, श्यालकः, भ्रातृपत्नी, धर्मः, तीर्थयात्रा चेत्यादिकाः विषयाः विविच्यन्ते ।भावोऽयं आपोक्लिमनाम्ना तथा च त्रिकोणभावनाम्नापि प्रसिद्धोऽस्ति । अनेन भावेन उपर्युक्तानां विषयाणां नवमभावस्थितद्रुष्टग्रहराश्यनुसारं विचारः विधीयते । नवमस्थानं भाग्यस्थानम्, अतो महत्त्वपूर्णमिदं स्थानं मतं विद्वद्भिः । यतो हि "भाग्यवन्तं प्रसूयेथाः" इति महाभारते कुन्ती वचनम्। भाग्यवतो नरस्य जीवनमेव जीवनं कथयितुं शक्यते नान्यस्य । भाग्यहीनस्य नरस्य आयुषः सुखम्, न शरीरसुखम्, न मातृ-पितृसुखंन च धनसुखं भवति । कथितमस्ति यत् "न बन्धुमध्ये धनहीनं जीवनम्" इति। तदुपरि- "भाग्ये दृढे सर्वसुखं नरस्य भाग्ये विनष्टे सकलं विनष्टम्" । मानसागर्यामपि-**यस्यास्ति वित्तं स नरः कुलीनः, स पण्डितः स श्रुतिमान् गुणज्ञः । स एव वक्ता स च दर्शनीयो भाग्यान्वितः सर्वगुणैरुपेतः।।"** जीवनेसर्वं सुखं भाग्याधीनमेव भवति । कदाभाग्योदयः इति प्रश्ने उक्तं यत्- भाग्यस्थो रविस्तस्य द्वाविंशतितमे वर्षे, चन्द्रे सति चतुर्विंशतितमे वर्षे, भौमे सति अष्टाविंशतितमे, बुधे सति द्वात्रिंशत्तमे, गुरौ षोडशे वर्षे, शुक्रे पञ्चविंशतितमे वर्षे तथा च भाग्यस्थ: शनिः तदा षट्त्रिंसत्तमे वर्षे भाग्योदयो जायते ।[199] जातकसङ्ग्रहे लिखितं यत्- यदि भाग्येशः केन्द्रस्थः (१,४,७,१०) स्यात्तदा जातकः आयुषः

---

[198] दीर्घायुरनुपमसुखः शुक्रे निधनाश्रिते धनसमृद्धः। भवति पुमान् नृपतिसमः क्षणे क्षणे लब्धपरितोषः।। सारावली ३०/६९

[199] मानसागरी, भाग्यभवनविचाराध्यायः, श्लो.-३

प्रथमावस्थायां भाग्योदयं लभते। यदि भाग्येशः त्रिकोणस्थो अथवा उच्चस्थो अथवा उच्चराशिगः स्यात्तदा आयुषो मध्यभागे भाग्योदयो भवति। यदि भाग्येशः स्वगृही मित्रराशिस्थो वा स्यात्तदा आयुषोऽन्तिमावस्थायां भाग्योदयो भवति।[200]महर्षिपाराशरो नवमभावस्य महत्त्वं प्रकटयन् लिखितवान् यत् बलवतो भाग्येशस्य यदि बलवता केन्द्रेशेन सह समागमः स्यात् तदा उत्कृष्टयोगकारिकास्थितिर्जायते। यथा-**"त्रिकोणाधिपयोर्मध्ये सम्बन्धो येन केनचित्। बलिनः केन्द्रनाथस्य भवेद्यदि सुयोगकृत्।।"** राहुकेत्वोः सम्बन्धोऽपि भाग्योदयकारकः कथितः।

### ४.२३.१० दशमभावाद् विचार्यविषयाः

कर्मभावः, तदन्तर्गतत्वेन राज्यम्, आकाशवृत्तिः, आस्पदम् (सम्भावना, योग्यम्, पात्रत्वम्), व्यापारः, प्रतिष्ठा, पिता, मानम्, ज्ञानम्, राज्यम्, गमनम्, आज्ञा, प्रवासश्चेत्यादिकाः विषयाः विविच्यन्ते। भावोऽयं खकेन्द्रम्, कण्टकम्, चतुष्टयभावः, उपचयभाव नाम्ना ज्ञायते। भावेनानेन उपर्युक्तानां विषयाणां दशमभावस्थितदृष्टग्रहराश्यनुसारं विचारः विधीयते। उदरपूर्तये मानवो जीविकासाधनमन्वेष्यति। लग्नात् चन्द्रात् वा दशमस्थो ग्रहः स्यात् तदा द्रव्येण मानवस्य जीविकोपार्जनं भवति। किन्तु जातकाभरणे लिखितं यत्- लग्नाच्चन्द्रात् वा यदि दशमस्थः सूर्यस्तदा जातकोऽनेकैः उद्योगैः धनार्जनं, बलवृद्धिं, लोकाधिपत्यं, स्वस्थं शरीरं मानसिकप्रसन्नतां च लभते।"[201]

---

200 भाग्याधिपश्चेद्यदिकेन्द्रसंस्थश्चाद्येवयस्येव सुखोदयः स्यात्।
त्रिकोणगः स्वोच्चगतोथवाचेन्मध्येवयस्यस्य फलप्रदः स्यात्।
भाग्याधिनाथः स्वगृहेथमित्रगृहेथवास्याद्वयसोन्त्यभागे।। जातकसङ्ग्रहः, नवमभावविचारः २२

201 दिवामणिः कर्मणि चन्द्रतन्वोर्द्रव्याण्यनेकोद्यमवृत्तियोगात्। सत्त्वाधिकत्वं नरनायकत्वं पुष्टत्वमङ्गे मनसः प्रसादः।। जातकाभरणम्, दशमभावविचारः ५

कल्याणवर्माऽपिजातकाभरणमनुमोदितवान्। दशमगः सूर्यो जातकं बुद्धिमन्तमैश्वर्यवन्तम्, बलवन्तम्, धनवन्तम्, वाहनसुखिनम्, पुत्र-बान्धवयुतम्, कार्यसाधकंवीरपुरुषं च करोति ।[202]

## ४.२३.११ एकादशभावाद् विचार्यविषयाः

लाभभावः, तदन्तर्गतत्वेन आयविचारः, धन-मित्र-पुत्र-जाया-पशु-यश-रत्नादीनां वृद्धिः, वस्तुलाभश्चेत्यादिकाः विषयाः विविच्यन्ते ।भावोऽयं उत्तमभावः, उपान्त्यभावः(अन्तिमभावसमीपस्थः भावः), भवभावः, पणफरभावः, उपचयभावेत्यादिनामभिः ज्ञायते । एकादशभावस्थितदृष्टग्रहराश्यनुसारं उपर्युक्तानां विषयाणां विचारः विधीयते। लाभस्थो यदि शुभग्रह: स्यात्तदा जातकः शुभकर्मणा, पापग्रहस्तदा पापकर्मणा धनं लभते । मानसागर्यां कथितं यत् ‘लाभस्थाने ग्रहाः सर्वे राज्यफलप्रदाः’ अर्थात् लाभस्थाः सर्वे ग्रहाः राज्यफलदातारो भवन्ति । काशीनाथेन कथितं यत् “लाभे सूर्ये समुत्पन्नो नानालाभसमन्वितः। सात्त्विको धार्मिको ज्ञानी रूपवानपि जायते ।।” इत्थमन्ये ग्रहाऽपि लाभस्थाने स्थित्वा शुभफलमेव ददति।

## ४.२३.१२ द्वादशभावाद् विचार्यविषयाः

व्ययभावः, रिष्फभावः, प्रान्त्यभावः (अन्तिमः भावः), अन्त्यभावः, त्रिकभावः, आपोक्लिमभावः, लग्नस्य अन्यखण्डभावः द्वादशभावश्चेत्यादिनामभिः ज्ञायते। तदन्तर्गतत्वेन भावेन व्ययः, शत्रुवृत्तान्तः, नेत्रे, मोक्षः, हानिश्चेत्यादिकाः विषयाः विविच्यन्ते । संक्षेपतः द्वादशभावद्वारा एव जातकस्य

---

202 अतिमतिरतिविभवबलो धनवाहनबन्धुपुत्रवान् सूर्ये। विद्यारम्भः शूरो दशमेऽधृष्यः प्रशस्यश्च।। सारावली ३०/११

बाह्याभ्यन्तरव्यक्तित्वचेष्टारुच्यादीनां भविष्यबोधः कर्तुं शक्यते । द्वादशस्थाः शुभग्रहाः सन्मार्गे, सत्कार्येषु, धनव्ययं च कारयन्ति । अशुभाः पापग्रहाः द्वादशस्थाः कुमार्गेऽसत्कार्येषु धनव्ययं कारयन्ति । व्ययस्थाने शुभग्रहाः व्ययेशश्च स्वोच्चराशिगः शुभगृहयुतो दृष्टो वा स्यात्तदा जातको मोक्षगामी भवति । व्ययेषः सपापः, व्ययस्थानमपि पापग्रहयुतं दृष्टं वा स्यात्तदा जातको देशे देशान्तरे वा भ्रमति ।[203]

यस्य भावस्य पतिः अस्तंगतः संयुतः, स्वभावं न पश्यति, मृतो जातः, वृद्धः, सुप्तः पीडितो वा जातः तद्भावस्य फलानि विनश्यन्ति । यथोक्तम्-

**यो यो भावपतिर्नष्टस्त्रिकेशाद्यैश्च संयुतः ।**

**भावं न वीक्षते सम्यग्ग्रहो वाऽपि मृतो यदा ।**

**स्थविरो वा भवेत्खेट: सुप्तो वाऽपि प्रपीडितः ।**

**तदा तद्भावजं सौख्यं नष्टं ब्रूयाद्विशङ्कितः ।।**[204]

## ४.२४ द्वादशभावानां कारकग्रहाः

लग्नस्य कारको ग्रहः सूर्यः, धनभावस्य कारको ग्रहः गुरुः, सहजभावस्य कारको ग्रहो भौमः, सुखभावस्य कारकौ ग्रहौ चन्द्रोबुधश्चोभौ मन्येते, पञ्चमभावस्य कारको ग्रहो गुरुः, षष्ठभावस्य कारकौ ग्रहौ शनिभूमौ स्तः, सप्तमभावस्य कारको ग्रहः शुक्रः, अष्टमभावस्य कारको ग्रहः शनिरस्ति, नवमभावस्य कारकौ ग्रहौ सूर्यगुरूस्तः, दशमभावस्य कारकाः ग्रहाः सूर्य-बुध-गुरु-शनैश्चराश्च सन्ति, लाभभावस्य कारको ग्रहो गुरुरस्ति, द्वादशभावस्य कारको ग्रहः शनिरस्ति।

---

203 बृहत् पाराशरहोराशास्त्रम् २४/९-१२

204 बृहद्पाराशरहोराशास्त्रम् १५/१३-१४

महर्षिपाराशरेण बृहज्जातके लिखितं यत्-

**सूर्यो गुरः कुजः सोमो गुरुर्भौमः सितः शनिः ।**

**गुरुश्चन्द्रसुतो जीवो मन्दश्च भावकारकाः।।**